ट्टकृते सप्तशतीव्याख्याने द्वितीयोऽध्यायः॥ २॥ ऋषिरुवाच॥ निहन्यमानमिति॥ २॥ ॥

२||३|| तस्येति || शरोत्कराः समूहः वाजिनां यन्तारं च रथं च जघानेत्यन्वयः || ४ चिच्छेदेति || आशुगा बाणाः ||४||५||
सिंहमिति || सव्ये वामे ||६|| तस्याः इति || पफाल विशीर्णः तस्यामुद्गमित्यन्वयः ||७|| चिक्षेपेति || त

स देवीं शरवर्षेण ववर्ष समरेसुरः || यथा मेरुगिरेः शृंगं तोयवर्षेण तोयदः ||२|| तस्य छित्वा
ततो देवी लीलयैव शरोत्करान् || जघान तुरगान्बाणैर्यन्तारं वाजिनां रथम् ||३|| चिच्छेद च
धनुः सद्यो ध्वजं चातिसमुच्छ्रितं || विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः ||४|| स छिन्न
धन्वा विरथो हताश्वो हतसारथिः || अभ्यधावत तां देवीं खड्गचर्मधरोसुरः ||५|| सिंहमाहत्य
खड्गेन तीक्ष्णधारेण मूर्धनि || आजघान भुजे सव्ये देवीमप्यतिवेगवान् ||६|| तस्याः खड्गो
भुजं प्राप्य पफाल नृपनंदन || ततो जग्राह शूलं स कोपादरुणलोचनः ||७|| चिक्षेप च
ततस्तत्तु भद्रकाल्यां महासुरः || जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ||८|| दृष्ट्वा
तदापतच्छूलं देवी शूलममुंचत || तच्छूलं शतधा तेन नीतं स च महासुरः ||९|| हते तस्मि
न्महावीर्ये महिषस्य चमूपतौ || आजगाम गजारूढश्चामरस्त्रिदशार्दनः ||१०|| सोपि शक्तिं
मुमोचाथ देव्यास्तामम्बिका द्रुतं || हुंकाराभिहतां भूमौ पातयामास निःप्रभां ||११|| भग्नां श
क्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः || चिक्षेप चामरः शूलं बाणैस्तदपि साच्छिनत् ||१२||

तच्छूले || अंबराद् रविबिंबमिवेत्युत्प्रेक्षणान्वयि || तेजोभी रवीत्यत्र रु लोपः इति दीर्घः ||८|| दृष्ट्वेति || ततः एवं स्य
स्य शूलमापततः || आगच्छतः दृष्ट्वेत्यन्वयः || स च शतधा नीतः इति शेषः ||९||१०|| सोपीति || हुंकारेणे

सप्त॰ ॥२२॥२२॥

श्री॰
द॰ ३॰
टी॰
२२

ततः इति ॥ समुत्पत्य आप्लुत्य गजकुंभांतरस्थित इत्येकं पदम् ॥२३॥ युध्यमानाविति नागान् ॥ गजान् ॥
युयुधातेनीत्यत्र मध्यस्थानाभावश्छांदसः ॥२४॥ ततः इति ॥ युद्धानंतरं वेगात्खमुत्पत्य गगनमाप्लुत्य तेनैव निपत्या
वतीर्येत्यर्थः ॥२५॥ उदग्रश्चेति ॥ रणे युद्धे दंतैर्गजदंतैर्निर्मितायुधैर्मुष्टिभिः ॥ तलैः चपेटैश्चान्यत् ॥ प

ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः ॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा ॥२३॥
युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ ॥ युयुधातेतिसंरब्धौ प्रहारैरतिदारुणैः ॥२४॥
ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतं ॥२५॥
उदग्रश्च रणे देव्या शिलावृक्षादिभिर्हतः ॥ दंतमुष्टितलैश्चैव करालश्च निपातितः ॥२६॥
देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं ॥ वाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकं ॥२७॥
उग्रास्यमुग्रवीर्यं च तथैव च महाहनुं ॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी ॥२८॥ बिडाल
स्यासिना कायात्पातयामास वै शिरः ॥ दुर्धरं दुर्मुखं चोभौ शरैर्निन्ये यमक्षयं ॥२९॥ एवं
संक्षीयमाणे तु स्वसैन्ये महिषासुरः ॥ माहिषेण स्वरूपेण त्रासयामास तान्गणान् ॥३०॥

द्वा ॥ दंतैर्दंतद्वतैरित्यर्थः ॥२६॥ देवीति ॥ उद्धतो ॥ तन्नामानं भिंदीनिदमथ्थाः ॥ २७ ॥ २८॥ बिडाल
स्येति ॥ यमक्षयं यमगृहं ॥२९॥ एवमिति ॥ गणान्निष्क्रामभयान् ॥ ३०॥ णमायनमः

२२

कांश्चिदिति ॥ खुरः कवर्गादि ॥ २१ ॥ वेगेनेति ॥ वेगो गमनं भ्रमणं मण्डलाकारगतिः ॥ २२ ॥ नि
पात्येति प्रमथा गणाः ॥ २३ ॥ २४ ॥ वेगेति ॥ वेगयुक्तभ्रमणेन विक्षुण्णा क्षुण्णा हिंसा ॥ व्यशीर्येनक

कांश्चित्तुंडप्रहारेण खुरक्षेपैस्तथापरान् ॥ लांगूलताडितांश्चान्यान्छृंगाभ्यां च विदा
रितान् ॥ २१ ॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च ॥ निःश्वासपवनेनान्यान्पातयामा
स भूतले ॥ २२ ॥ निपात्य प्रमथानीकमभ्यधावत सोऽसुरः ॥ सिंहं हन्तुं महादेव्याः कोपं च
क्रे ततोऽम्बिका ॥ २३ ॥ सोऽपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः ॥ शृंगाभ्यां पर्वता
नुच्चांश्चिक्षेप च ननाद च ॥ २४ ॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत ॥ लांगूलेनाह
तश्चाब्धिः प्लावयामास सर्वतः ॥ २५ ॥ धुतशृंगविभिन्नाश्च खण्डं खण्डं ययुर्घनाः ॥ श्वासा
निलास्ताः शतशो निपेतुर्नभसोऽचलाः ॥ २६ ॥ इति क्रोधसमाध्मातमापतन्तं महासुरं ॥
दृष्ट्वा सा चण्डिका कोपं तद्वधाय तदाकरोत् ॥ २७ ॥ सा क्षिप्त्वा तस्य वै पाशं तं बबन्ध महासुरं ॥
तत्याज माहिषं रूपं सोऽपि बद्धो महामृधे ॥ २८ ॥

मेकर्नेति रूपं सर्वतः सर्वे सार्वविभक्तिकस्तसिः ॥ प्लाव
यामास जलेन तिरोधत्त ॥ २५ ॥ धुतेति ॥ कंपितेनत्यर्थः ॥ खण्डं खण्डं यथा स्यात्तथा क्रियायां ॥ श्वासानिलेना
काशगमनमस्ताः क्षिप्ता अचलाः पुनराकाशान्निपेतुरित्यर्थः ॥ २६ ॥ २७ ॥ सेति सा तस्योपरि पा
शोऽद्धिः सातेन बबन्धेत्यन्वयः ॥ २८ ॥ २८ ॥ ॥ ॥ ॥ २८

श्री॰

स॰ दु॰
टी॰
२३

ततः इति ।। तस्य सिंहीभूतस्य अकृपन देव्यो निशोध ः ।।२९।। ततः इति ।। तं पुरुषं देवी आश्च खड्ग चर्मणेति ।
समाहारद्वंद्वः ।। ततस्तु तेन सायकैः छिन्ने दैत्यस्तु गजोऽभवत् ।।३०।। करेणेति महासिंहं ।। देवीवाहनं ।। कर्षतः दैत्यस्य
सिंहमित्यादिः ।। निरकृन्तत अच्छिनत् छेदनं ।।३१।। ततः इति ।। तथैव क्षोभयामास देव ।।३२।। ततः इति ।। महिषस्वरूपी

ततः सिंहोभवत्सद्यो यावत्तस्याम्बिका शिरः ।। छिनत्ति तावत्पुरुषः खड्गपाणिरदृश्यत ।।२९।। त
त एवाशु पुरुषं देवी चिच्छेद सायकैः ।। तं खड्गचर्मणा सार्द्धं ततः सोभून्महागजः ।।३०।। करेण
च महासिंहं तं चकर्ष जगर्ज च ।। कर्षतस्तु करं देवी खड्गेन निरकृन्तत ।।३१।। ततो महासुरो भू
यो माहिषं वपुरास्थितः ।। तथैव क्षोभयामास त्रैलोक्यं सचराचरं ।।३२।। ततः क्रुद्धा जगन्माता
चण्डिका पानमुत्तमम् ।। पपौ पुनः पुनश्चैव जहासारुणलोचना ।।३३।। ननर्द चासुरः सोपि ब
लवीर्यमदोद्धतः ।। विषाणाभ्यां च चिक्षेप चण्डिकां प्रति भूधरान् ।।३४।। सा च तान्प्रहितांस्तेन चू
र्णयन्ती शरोत्करैः ।। उवाच तं मदोद्धूतमुखरागाकुलाक्षरं ।।३५।। देव्युवाच ।। गर्ज गर्ज क्षणं मूढ
मधु यावत्पिबाम्यहं ।। मया त्वयि हतेत्रैव गर्जिष्यन्त्याशु देवताः ।।३६।।

वाक्यनाशेन जायमानदयादिविक्षेदायात्र मधुपानं युद्धधर्मं बोधयितुं श्रमनाशनं वा ।। एतेन पानं मुख्यं
कर्मेति स्फुटं ।। पानादरुणलोचना ।। पुनः पुनस्ते हास मचेत्यन्वयः ।।३३।। ननर्देति बलं शौर्यं वीर्य
मुत्साहः ।। ताभ्यां मदो गर्वः ।।३४।। सा चेति ।। मदेनोद्धूत अत्यन्तज्ञाता ।। मुखरागो यस्याः ।। सा अत्याकुला
क्षरमिति वचनक्रियाविशेषणं ।। मय्यबभावाय ।।३५।। देव्युवाच ।। गर्जेति गर्जेति ।। सप्रमेयगर्विहङ्कारमदेन च

23

ऋषिरुवाच ॥ एवमिति ॥ समुत्पत्य कर्दनेन हतं तेनासावारूढा ॥ अथ पपनं पादेनाक्रम्य टंबधा कंठे शूलेनाता
डयदित्यन्वयः ॥ ३७ ॥ ततः इति तया पदाक्राक्रांतः टधृतोपिसः ततः शूलताडनोत्तरम् ॥ ततः महिषा
सुरूपीयान्निजमुखात् अर्धनिष्क्रांतः ॥ निःसृतार्धकाय एव देव्या वीर्येण अश्वनिश्वनिरोधेन संवृतः सनिव

ऋषिरुवाच एवमुक्त्वा समुत्पत्य साऽऽरूढा तं महासुरं ॥ पादेनाक्रम्य कंठे च शूलेनैनमताडयत् ॥ ३७ ॥
ततः सोपि पदाक्रान्तस्तया निजमुखात्ततः ॥ अर्द्धनिष्क्रान्त एवासीद्देव्या वीर्येण संवृतः ॥ ३८ ॥ अ
र्द्धनिष्क्रान्त एवासौ युध्यमानो महासुरः ॥ तया महासिना देव्या शिरश्छित्वा निपातितः ॥ ३९ ॥ ततो
हाहाकृतं सर्वं दैत्यसैन्यं ननाश तत् ॥ प्रहर्षं च परं जग्मुः सकला देवतागणाः ॥ ४० ॥ तुष्टुवुस्तां सु
रा देवीं सह दिव्यैर्महर्षिभिः ॥ जगुर्गंधर्वपतयो ननृतुश्चाप्सरोगणाः ॥ ४१ ॥ इति श्रीमार्कंडे
यपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये महिषासुरवधो नाम तृतीयोऽध्यायः ॥ ३ ॥ सांगा
यै स्पष्टविंशतिवर्णात्मिकायै महाहुतिं समर्पयामि नमः स्वाहा ॥ श्लोकाः ॥ ४१ ॥ मंत्राः ॥ ४४ ॥

द्धः निष्क्रमितं नाशकदित्यर्थः ॥ ३८ ॥ अर्द्धेति एवं च शिरश्छेदोद्भवं ॥ तद्दर्शनं शूलपाणिना भिन्नच शिरश्छेद
योद्भवाय समन्वयो बोध्यः ॥ एतेन षष्टिविशेषः ॥ कल्पान्तरीयइति ॥ तत्र ॥ पुराकल्पे यथा हन्नेश निकल्पनं पूर्ववत् ॥ अ
वतेन स्वयं देवी दैत्यानां नाशनायवै ॥ तथैव ज्ञायते बुद्धमिति कालिकापुराणात् ॥ हिनं व्यवहारः ॥ तेन क्रियाम
निकल्पमेकैव न तत् विज्ञानीया ॥ अन्यत्रोक्तकल्पभेदेन तत्तु विद्वेदो हरिवंशादिषु मार्कण्डेयादिष्वेव तनं ॥ अत्रैवेव नं

श्री
सं.टु.
टी.
२४

प्रथमेंशे॥ प्रतिकल्पं तत्स्मचरित्रमेवोत्तानार्थेति॥ नारदप्रश्ने॥ प्रतिकल्पे नेवचरितेनाग्रसंशयः इति॥ ब्रह्मणा
उत्तराह्व॥ ३९॥ ननु इति॥ ननाशपलायितं हा हेति कृतं येनेति सैन्यविशेषणं॥ ४०॥ तुष्टुवुरिति॥ सुराः इन्द्राद्या
दिवौकसो ब्रह्मादिभिर्महर्षिभिः सह मह तुष्टुवुरित्यर्थः॥ ४१॥ इति श्रीसप्तशतीव्याख्यायां तृतीयोध्यायः॥ ३॥
ॐ तुष्टुवुः सुराः इत्युक्तं तान्निरूपयति॥ महर्षिरुवाच॥ शक्रादय इति॥ आदिना महर्षयः॥ तस्मिन् महिषासु
रे देव्या निहते दुरात्मनि तथा शिरोधरा ग्रीवा॥ अंसाः स्कंधः॥ पुलकाः रोमांचाः॥ १॥ देव्येति॥ आत्मनेव्याप्तेन

महर्षिरुवाच॥ ॐ शक्रादयः सुरगणा निहतेतिवीर्ये तस्मिन्दुरात्मनि सुरारिबले च देव्या॥ तां तुष्टुवुः
प्रणतिनम्रशिरोधरांसा वाग्भिः प्रहर्षपुलकोद्गमचारुदेहाः॥ १॥ देव्या यया ततमिदं जगदात्म
शक्त्या निःशेषदेवगणशक्तिसमूहमूर्त्या॥ तामम्बिकामखिलदेवमहर्षिपूज्यां भक्त्या नताः
स्म विदधातु शुभानि सा नः॥ २॥ यस्याः प्रभावमतुलं भगवाननन्तो ब्रह्मा हरश्च न हि वक्तुमलं बलं
च॥ सा चण्डिकाखिलजगत्परिपालनाय नाशाय चाशुभभयस्य मतिं करोतु॥ ३॥ या श्रीः स्वयं
सुकृतिनां भवनेष्वलक्ष्मीः॥ पापात्मनां कृतधियां हृदयेषु बुद्धिः॥

तः स्वरूपेव निःशेषदेवगणशक्तिनां समूहनाय हृदयेन व्यक्तिसमूह एव तेजोंशाः मचयपवास्मूर्तिं
विग्रहोयस्याः तयेत्यर्थः समूहः इति भावकः नता स्मेत्यत्र विसर्गलोपः॥ २॥ यस्याः इति॥ यस्याः अतुलं प्र
भावं तेजः॥ बलं शारीरं वक्तुमनंतः सहस्रास्योपि॥ ब्रह्मा चतुर्मुखोपि हरः सर्वशक्तिरपि नालं न पर्याप्तः॥ अ
शुभेभ्यो भयस्येत्यर्थः॥ द्वंद्वो वा समाहारो॥ ३॥ या श्रीरिति॥ पापात्मनां भवनेषु अलक्ष्मीः कृतधियां निर्म

24

लोनः कारणानां हृदयेषु वबुद्धिः ॥ स्वर्गापवर्गसाधनज्ञानं सतां हृदयेषु श्रद्धा ॥ आस्तिक्यबुद्धिः कुलत्र ।
नम्रभवस्पृष्टद्वेषाज्जन्मनो हृदयेषु लज्जा ॥ करणीयाम्रह निजनकोनः कारणह्नि विशेषः ॥ नना
म्नि मग्नत ॥ ४ ॥ एषा श्रापातनं लु निव लूनलू म लैन्य वन्याह ॥ किमिति ॥ श्रमणादेन्या ॥ देवा
धिवादयः गणाः प्रमथाद्यास्तन्मूर्तिषु ॥ अविनश्चलमवृतिस्फुरनादनिरूपणीयेनरूपेण ॥ अतः किंके
नप्रकारेण वर्णयाम्रचपरः ॥ देन्यनाशकाविभूतिवीर्य ॥ अनिश्चलुत्कृक्षवपरपुरुषेषु यानिचरि

श्रद्धा सतां कुलजनप्रभवस्य लज्जा तां त्वां नताः स्म परिपालय देवि विश्वम् ॥ ४ ॥ किं वर्ण
याम तव रूपमचिन्त्यमेतत् किं चातिवीर्यमसुरक्षयकारि भूरि ॥ किं चाहवेषु चरितानि ताति
नवानि यानि सर्वेषु देव्यसुरदेवगणादिकेषु ॥ ५ ॥ हेतुः समस्तजगतां त्रिगुणापि दोषै
र्न ज्ञायसे हरिहरादिभिरप्यपारा ॥

नानि ॥ तान्यप्यनिश्चलत्वक्षणानि ॥ अतः किं वर्णयामेत्यन्वयः ॥ सर्वज्ञाः चिन्त्यपदमवेति ॥ ५ ॥ मूलप्र
कृतिश्वरूपमेवेत्याह ॥ हेतुरिति समस्तजगतां हेतुर्मूलकारणं ॥ तत्र हेतुयतस्त्रिगुणा सत्वरजस्त
मोयुता ॥ नन्वेवं रागादिसंबंधेन सर्वकारणत्वेन स्यादत आह ॥ अपीति ॥ त्रिगुणापि दोषैरागादिभि
र्न ज्ञायसे नाश्रिता भवसि ॥ यद्वा दोषैर्विशिष्टा केनापि ॥ न ज्ञायसे न तद्भावादित्यर्थः ॥ नन्वेवं ॥ परि
च्छिन्नत्वात्सर्वहेतुत्वं न स्यादत आह ॥ हरिहरादिभिरप्यपारा ॥ अज्ञानपरिच्छेदा ॥ परिच्छेदाभावा

श्री.

चं.दु.टी.

२५

25

रूपत्वेः ॥ तत्र हेतुः यतः सर्वाश्रया सर्वमाश्रयः कार्यं यस्याः सा ॥ कार्यं हि कारणमाश्रयते ॥ सर्वं त्वं वनेमा
नाच ॥ यतस्त्वमव्याकृता नाषड्विधविकारहीनत्वात् ॥ नामरूपहीनत्वाच्च ॥ हि यतः संसारस्याद्या अतस्त्वमाद्य
प्रकृतिः ॥ सत्वरजस्तमसां साम्यावस्थासि ॥ कीदृशी परमा ॥ परः आत्मा मीयते जीवभावेन क्षिप्यते येन यया
परमात्मैवाप्रावृत्त्य मोऽभ्यासे जीवत्वेनावभासते ॥ ५ ॥ यस्याः इति ॥ हे देवि यस्याः समुदीरणेन समस्त
सुरतां सकलमखे समस्तः ॥ सर्वे यज्ञेषु तृप्तिं प्रयाति सा स्वाहा त्वमेवासि वैष प्रसिद्धं ॥ तथा पितृगणस्या

सर्वाश्रयाखिलमिदं जगदंशभूतमव्याकृता हि परमा प्रकृतिस्त्वमाद्या ॥ ६ ॥ यस्याः समस्तसुरता
समुदीरणेन तृप्तिं प्रयाति सकलेषु मखेषु देवि ॥ स्वाहासि वै पितृगणस्य च तृप्तिहेतुरुच्चार्यसे त्वमत
एव जनैः स्वधा च ॥ ७ ॥ या मुक्तिहेतुरविचिन्त्यमहाव्रता त्वमभ्यस्यसे सुनियतेन्द्रियतत्त्वसा
रैः ॥ मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासि सा भगवती परमा हि देवि ॥ ८ ॥

पितृतृप्तिहेतुस्त्वमेव यतः ॥ अत एव जनैः पितृकर्मणि स्वधा वउच्चार्यसे त्वं स्वाहा देवकर्मणि ॥ ७ ॥ मुक्ति
निःस्वरूपत्वमुक्ता ब्रह्मविद्यापि त्वमेवेत्याह ॥ येति ॥ हे देवि या मुक्तिहेतुः ॥ अविचिन्त्यमनुष्ठेयत्वं चिन्ताया
अविषयं ॥ महाव्रतं ॥ अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहरूपं योगशास्त्रप्रसिद्धं साधनं यस्याः ॥ ईदृशी
त्वया सा भगवती भगवद्विषया परमा उत्कृष्टा विद्या तद्विषयावरणभंजिका ब्रह्मज्ञानरूपा त्वमेवासि
हि यतः ॥ अतस्त्वमस्तसमस्तरागादिदोषैर्मोक्षेच्छुभिर्मुनिभिः शीलनेऽभ्यस्यसे ॥ त्वमेव ब्रह्मस्वरूपज्ञानेन मारोप

शब्देति ॥ सुविमलानां अपौरुषेयत्वेन दोषरहितानां ॥ ऋग्वेदयजुषां उद्गीथः सामगानं भक्तिविशेषः तेन रम्याः पद
पाठो येषां साम्नां तेषां च निधानमाश्रयः शब्दब्रह्मस्वरूपा ॥ भवस्य संसारस्य भावनाय प्रवृत्त्यविच्छेदाय ॥ वा-
र्त्ता देवीप्येन नशीला · त्रयी वेदत्रयी · सा त्वं भगवती वार्त्ता विशेषणं सर्वजगतां अतिशयेन पीडाहन्त्री ॥ अ
नेन सर्वविद्यास्वरूपत्वमेवोक्तम् ॥ ९ ॥ नदर्थिता अपि त्वमेवेत्याह ॥ मेधासीति ॥ मेधा सरस्वती सैव दुःख
प्राप्यत्वेन दुर्गापि प्रोच्यते ॥ दुर्गमसंसारसागरस्य नौः ज्ञानद्वारा ॥ एवं पूर्वार्द्धेन आख्यानमुक्तं ॥ प्रसिद्धनौता

शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्यपदपाठवतां च साम्नां ॥ देवी त्रयी भगवती भ
वभावनाय वार्त्ता च सर्वजगतां परमार्त्तिहन्त्री ॥ ९ ॥ मेधासि देवि विदिताखिलशास्त्रसारा दुर्गासि
दुर्गभवसागरनौरसंगा ॥ श्रीः कैटभारिहृदयैककृताधिवासा गौरी त्वमेव शशिमौलिकृतप्रति-
ष्ठा ॥ १० ॥ ईषत्सहासममलं परिपूर्णचन्द्रबिम्बानुकारि कनकोत्तमकान्तिकान्तं ॥ अत्यद्भुतं प्रहृत
मात्तरुषा तथापि वक्त्रं विलोक्य सहसा महिषासुरेण ॥ ११ ॥ दृष्ट्वा तु देवि कुपितं भ्रुकुटीकरालमुद्यच्छशाङ्क
सदृशच्छवि यन्न सद्यः प्राणान्मुमोच महिषस्तदतीव चित्रं ×

व्यतिरेकमाह ॥ असंगेति ॥ साहित्यकरणे तथा
ऽपि संगवती ॥ शशिमौलिकृतानामनिष्ठा आसक्तिर्यया ॥ अथ शरीरेणानन ॥ उन्मादेन शोभावैभवमीतं चोक्तं ॥ १० ॥ ईष
दिति ॥ ईषद्धासः सहितं छेदः सः परश्चासन्नायः ॥ एवं द्वौ कृशुल्लविशिष्टं वक्त्रं विलोक्यापि आप्तरोषेण महि
षासुरेण सहसा दर्शनसमकालमेव न यातिनिष्टुरयत्प्रहृतं तेन दन्त्याश्चर्यमित्यर्थः ॥ जगन्मोहकमपि नन
समाह ॥ अत्यन्तविस्मयरोषं नाटयन्त्यापि च येन देव्याः पवोत्कर्षः ॥ सिद्ध्यति ॥ ११ ॥ ॥ १२ ॥ ॥ १४ ॥

×कैर्जीव्यते हि कुपितान्तकदर्शनेन १२

श्री
च.उ.
टी.
२९

दृष्ट्वापिविनि॥ दृष्ट्वापीत्यर्थः॥ भ्रू॰को॰ भ्रुकुटीचक्रतातयाकरालंभीषणं॥ उद्यच्छशांकेनाप्यनेनानिरस्ता॥ अनेनमहि
षस्यानिषीवनेदेव्युक्तकषं॥ प्रागवदेव॥१२॥ देवीति॥ दे विप्रसीदेत्युक्ता विचार्यव्यथ्येमनदवः॥ प्रसन्नादेवन
वेत्याह॥ भवतीपरासाधुगृहामाबुद्धिर्यस्याः सादृशी॥ कथमेतज्ज्ञानं॥ तत्राह॥ यत्रानाभवायकोपवतीसती
नेनाशिताणिफलानिमस्यारिविनाशयसि॥ नत्वंसंप्रतिपन्निमह॥ विज्ञातमित्याशि॥ एवंचकोपाप्ययत्नाणिफल

देविप्रसीदपरमाभवतीभवायसद्योविनाशयसिकोपवतीकुलानि॥ विज्ञातमेतदधुनैवयदस्तमेत
न्नीतंबलंसुविपुलंमहिषासुरस्य॥१३॥ तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसीदतिध
र्मवर्गः॥ धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना॥१४॥ धर्म्याणिदेवि
सकलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीकरोति॥ स्वर्गंप्रयातिचततोभवतीप्रसादाल्लो
कत्रयेपिफलदाननुदेवितेन॥१५॥ दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैःस्मृतामतिमतीवशु
भांददासि॥

कोनत्तुसाभाविकइतिसत्त्वगुणप्रधानत्वेधनितेः॥१४॥ तेइति॥ संमताः महाजनांगीकृताः॥ धर्मवर्ग इतिनोवर्गः
धर्मार्थकाममोक्षरूपः॥ धन्याः पुण्यवन्तःसिद्धाः॥ निभृतानिनम्रयोषिताः शुभाश्च॥ अभ्युदयदासर्वमनोरथ
दा॥१४॥ धर्म्याणीति॥ हेदेविभवतीप्रसादात्॥ यःसुकृतीभागवतोमान्जिनपुण्यवान्सततमेवसुकृत
लब्धवान्प्रसादादेवअत्यादृतः॥ नित्यनैमित्तिकादावति॥ श्रद्धावान्सन्नितिदिनंप्रदिवसघटिकाच्छेदेन
सकलानिधर्म्याणिकर्माणिकरोति॥ पुनस्ततएवतात्स्वर्गंप्रयातिकर्मभ्यालब्धवान्प्रसादादेवस्वर्गं
प्रयातिततःक्रमेणचात्मादेव॥ ननुनिश्चये॥ तेनत्वंलोकत्रयेपिफलदाइतिज्ञायसेइतिशेषः॥१५॥

26

दुर्गे इति॥ दुर्गे दुर्गमे संकटे स्मृता ध्याता सती॥ नत्वामित्रैः॥ इति भिन्नदारिद्र्यशत्रुभावे बोध्या॥ भयं हरसि कुलं संधानवं
आर्द्रचित्ता स्निग्धचित्ता॥ दुर्गा स्मरणं च॥ दुर्गा जगदिदं दुर्गा सर्वस्य कारणं॥ अहं च दुर्गा इत्येवं रूपं॥
विष्णुर्जगदिदं सर्वे विष्णुः सर्वस्य कारणं॥ अहं विष्णुरिति चेद्यस्तु हि सोऽस्मरणे विष्णुः रिति विहरमाणश्ली
योजेः॥१६॥ सर्वोपकाराय निर्मथपापादयति॥ एभिरिति॥ दैत्यैरित्यर्थः॥ उपैति लभत इत्यर्थः॥ उपैतीति लट्॥ ए

दारिद्र्यदुःखभयहारिणि का त्वदन्या सर्वोपकारकरणाय सदार्द्रचित्ता॥१७॥ एभिर्हतैर्जगदु
पैति सुखं तथैते कुर्वन्तु नाम नरकाय चिराय पापं॥ संग्राममृत्युमधिगम्य दिवं प्रयान्तु मत्वेति नू
नमहितान्विनिहंसि देवि॥१८॥ दृष्ट्वैव किं न भवती प्रकरोति भस्म सर्वासुरानरिषु यत्प्रहिणो
षि शस्त्रम्॥ लोकान्प्रयान्तु रिपवोऽपि हि शस्त्रपूता इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी॥१९॥
खड्गप्रभानिकरविस्फुरणैस्तथोग्रैः शूलाग्रकान्तिनिवहेन दृशोऽसुराणां॥

नैदेव्या नामेन्द्रभ्युगमेन रकायेति॥ तादर्थ्ये चतुर्थी तथापि रणे मृत्युं प्राप्य स्वर्गं गच्छन्तु॥ इति हेतुद्वयेन
निहता जगद्धितार्थं हंसीत्यर्थः॥१८॥ दृष्ट्वैवेति॥ दर्शनोत्तरं भवती त्वं मात्रेणैव भस्मकरणक्षमा
प्येषु॥ एवं शास्त्रपातनप्रसिद्धिस्तेषामुत्तमलोकप्राप्त्यर्थ इति तेष्वयं कारुण्यमेवमिति॥ किंच तद्वचो भवे
त्तिनिभाव॥१९॥ खड्गेति॥ निकरः समूहः॥ विस्फुरणैः स्फुरणैः॥ निवहः समूहः॥ यद्विलयं ना
गता लटेन॥ अंशुमानस्य इंदुः खंड स्वयोग्य चमत्कारमाननं तव विलोकयतां तत्त्वेषामाश्चर्यमिति

श्री· चं· प्र· टी· २८

रिति शेषः ॥ १९ ॥ दुर्हृद्ग्रेति ॥ दुर्हृदां नान्तं पापं न्यशमनेन वशीले साभ्याविको गुणः नयान्यैरतुल्यमन
पद्माचिन्त्यं कीदृशमिति ना विषय ॥ दृष्ट्वेति किं ते त्वादिनोक्त रूपमाक्रान्तिः च परं दृष्टा स्रान्त्वसान्क्तमादे
वायेन दृष्टा ॥ यत्राक्रमोपघाते घादेत्यानाहत्य वीर्यं ॥ एवं चेदृशं पण्यादृशबलेन चेतं पाशस्ततो हनन म
पि ॥ तदीयपापशान्तये ॥ इति नेषुदयैव तया कृते निभावः ॥ २० ॥ कुतेति ॥ अनिहविमनोहरम ॥ विरोधार

पद्मागतानां विलयमं स्मृमरिङ्गुखंडयोग्यानननुवविलोकयनंतदेतन ॥ १९ ॥ दुर्हृत्नतनशमनेनव
देविशीलेन रूपं न येन तद्विचिन्त्यमतुल्यमन्यैः ॥ वीर्यं च हत्त्वहृतदेवपराक्रमाणां वैरिव्रजोपिस
कृटितेनुवदयान्तयोस्य ॥ २० ॥ कृतेनोपमाभवति ते स्मरणाक्रमस्य रूपं च शत्रुभयकार्यविनिहारि
रूप ॥ चित्रं कृपामम सनिष्ठुरताच दृष्टा न यत्र वद विवद भुवनत्रयेपि ॥ २१ ॥ त्रैलोक्यमेव दलि
ते रिपुनाशनेन त्रातं त्वया समरमध्ये निते पि हता ॥ नीता दिवं रिपुगणाभयमप्युपालनमस्मा
कमत्रमदस्मदरिभयं न मत्ते ॥ २२ ॥

त्रालंकारः ॥ कुतेनोपमेति त्वतीयात्राघितान ॥ चित्रं कृपारिपुषुपिउपकारकत्वात ॥ निष्ठुरतातस्यैव ॥ अ
त्र कृपास्वाभाविकी निष्ठुरता ना रापिनेति विरोधपरिहारः इति बोध्यम ॥ २१ ॥ त्रैलोक्यमिति ॥ त्वं पत्यं तन मे
कान्तयः ॥ नतोरिपुगणाः त्वं नमयरेवाकं भयमित्यतो भवमित्यनमपरे ॥ अनेन चित्रं कृपेत्यन द्विहसं
नमस्त्वेत्यनेन मस्कारातिरिक्तमत्युपकारकरणेनास्माकं सामर्थ्यमिति निषेधितम ॥ २२ ॥

27

||२३|| प्राच्यामिति || दक्षिणे रक्षस्व दक्षिणभागे || इति शेषः || भ्रामणेनेत्यत्र ह्रस्वाभावादार्षः || २४ || सौम्यानी

शूलेनेत्यादि रक्षास्मान्सर्वतः इत्यंतं चतुर्षु मंत्रेषु प्रत्येकं महालक्ष्म्यै नमः स्वाहा || इत्याहुतिचतु
ष्टयं दद्यात् || न तु स्तोत्रकाराहुतिः कवचाहुतिनिषेधात् || अथ कोपि महादेव्या दुर्गाहोमपरायणः ।
कवचाहुतिमात्रेण मरणेन निपातितः || कवचं शूलेनेति श्लोकचतुष्टयं कृतांजलिः पठेत् || शू
लेन पाहि नो देवि पाहि खड्गेन चांबिके || घंटास्वनेन नः पाहि चापज्यानिःस्वनेन च ||२३|| प्रा
च्यां रक्ष प्रतीच्यां च चंडिके रक्ष दक्षिणे || भ्रामणेनात्मशूलस्य उत्तरस्यां तथेश्वरि ||२४|| सौ
म्यानि यानि रूपाणि त्रैलोक्ये विचरंति ते || यानि चात्यंतघोराणि तै रक्षास्मांस्तथा भुवं || २५
खड्गशूलगदादीनि यानि चास्त्राणि तेंबिके || करपल्लवसंगीनि तैरस्मान्रक्ष सर्वतः ||२६||
घृतचंदनेन होमः || कर्पूरेण च || ऋषिरुवाच || एवं स्तुता सुरैर्दिव्यैः कुसुमैर्नंदनोद्भवैः ।
अर्चिता जगतां धात्री तथा गंधानुलेपनैः ||२७|| भक्त्या समस्तैस्त्रिदशैर्दिव्यैर्धूपैस्तु धूपिता ।
प्राह प्रसादसुमुखी समस्तान्प्रणतान्सुरान् ||२८||

नी || सौम्यानि शांतानि रूपाणि अत्यर्थं घोराणि संहारव्यापारा
णि || तथा भुवं पृथिवीं चेत्यर्थः ||२५|| खड्गेति संगः संगतानि ||२६|| ऋषिरुवाच || एवमिति || सुरैरिति त्रि
न्यायेन महर्षिपरमपि || नंदनं देवोद्यानं || दिव्यैरुत्कृष्टैः गंधाः श्रीगंधादयः अनुलेपनं श्रीचंदनादि ||२७||२८

श्री
च॰ ३
टी॰
२८

भक्त्येति त्रिदिवौकसो मनोज्ञैः पुष्पैरिति निपातः देव्युवाच व्रियतामिति देवा ऊचुः भगवत्येति २९ यत
इत्यर्थः पूर्वोक्तस्यार्थं उत्तरार्द्धमुत्तरत्रापि यदि चापि शत्रु एवमर्थं येयेव मन्या पिवरो देयः इति नवेद्यान
दावदमाणमस्तीत्यर्थः ३· संस्मृतेति हिंसेथाः स्याः उत्तरार्द्धमुत्तरत्रापि नसोति वित्तर्द्धि विभवै

देव्युवाच ॥ व्रियतां त्रिदशाः सर्वे यदस्मत्तोभिवाञ्छितं ॥ देवा ऊचुः ॥ भगवत्या कृतं सर्वं न किञ्चि
दवशिष्यते ॥ २९ ॥ यदयं निहतः शत्रुरस्माकं महिषासुरः ॥ यदि चापि वरो देयस्त्वयास्माकं महे
श्वरि ॥ ३० ॥ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः ॥ यश्च मर्त्यः स्तवैरेभिस्त्वां स्तोष्यत्यमला
नने ॥ ३१ ॥ तस्य वित्तर्द्धिविभवैर्धनदारादिसंपदां ॥ वृद्धयेस्मत्प्रसन्ना त्वं भवेथाः सर्वदाम्बिके ॥
ऋषिरुवाच ॥ इति प्रसादिता देवैर्जगतोर्थे तथात्मनः ॥ तथेत्युक्त्वा भद्रकाली बभूवान्तर्हिता
नृप ॥ ३३ ॥

दिति सह ॥ योगेन त्वया भुवने च समाहितं ॥ वित्तं ज्ञानं तस्य ऋद्धिः रूपवयः ॥ विभवा ऐश्वर्यादयः ॥ धनदा
रादीनां संपदस्त्वनुरूपाणां भावाः ॥ आदिना पुत्रादि वृद्धये उपचयाय ॥ ३२ ॥ ऋषिरुवाच ॥ इतीति ॥ तथात्म
नः आत्मनस्त्वर्थे इत्यन्वयः ॥ तथेत्युक्त्वा तथास्त्वित्युक्त्वा ॥ भद्रकालयतीति ॥ बधेयतीति ॥ भद्रकाल्यन्त
र्हिताः दृश्या बभूवन्मनयः ॥ ३३ ॥ श्री रामाय नमः

28

इतीति निस्पृहम॥३४॥पुनश्चेति॥गौरीदेहः देहकारणं यस्याः स्यर्थः॥समुद्भवः प्रादुर्भावः॥यथा येन प्रकारेण
नत्रहेतुः॥शुम्भवधो देवलोकरक्षणं च॥ननु तेनाप्युक्तम्॥कोऽयं स्तवं आह॥उपकारिणीति॥उपकारस्व
नकृणरुद्धेत्याघलड्.नत॥नप्रकारं मयामनुः निपातोऽयं॥व्याख्यानं लोकप्रसिद्धं॥उतामुष॥कृष्णलक्ष्मीनं तैल
क्ष्मी वाक्यं॥श्रमिष्टुतामेरः साहमहिषघ्नश्रषीत्वणान॥महिषानकरीरूकंदष्टदेवैर्महर्षिभिः॥उत्पन्निय

त्येतत्कथितं भूप संभूता सा यथा पुरा॥देवी देवशरीरेभ्यो जगत्त्रयहितैषिणी॥३४॥पुनश्च गौरीदेहा
त्सा समुद्भूता यथाभवत्॥वधाय दुष्टदैत्यानां तथा शुम्भनिशुम्भयोः॥३५॥रक्षणाय च लोकानां देवा
नामुपकारिणी॥तच्छृणुष्व मयाख्यातं यथावत्कथयामि ते॥३६॥इति श्रीमार्कण्डेयपुराणे सावर्णि
के मन्वन्तरे श्रीदेवीमाहात्म्ये शक्रादिस्तुतिर्नाम चतुर्थोऽध्यायः॥४॥ओं गौर्यै त्रिवर्णात्मिकायै त्रिशक्ति
लक्ष्म्यै महाहुतिं समर्पयामि नमः स्वाहा॥श्लो॥३४॥मन्त्रा॥४२॥अथ ध्यानम्॥ओं घण्टाशूलहलानि शंख
मुसले चक्रं धनुः सायकं॥हस्ताब्जैर्दधतीं घनान्तविलसच्छीतांशुतुल्यप्रभां॥गौरीदेहसमुद्भवां त्रिजग
तामाधारभूतां महापूर्वामत्र सरस्वतीमनुभजे शुम्भादिदैत्यार्दिनीम्॥

पुरुविक्रान्तिं स्तोत्रं चेव सर्वेश्वर॥कथयन्तिस्तुविस्तीर्णां ब्राह्मणा वेदपारगाः लभन्ते च फलं शश्वदाधिपत्यमनुष्य
रमिति॥महिषान्तकरीरुकं देवैर्महर्षिभिश्च दृष्टा॥देवाप्ययातानमिति॥स्तोके खिलदेवमहर्षिपूज्यत्वा विशे
षणान्॥पुष्पाभिः स्तुतपोया स्वेति स्तोके ब्रह्मर्षीणां स्तुतिकन्तेन मनिपाटनाचे निर्वोधम॥३६॥इति श्रीभ
स्कृतसप्तशतीगर्भजनागोजीकृत सप्तशतीव्याख्याने चतुर्थोऽध्यायः॥४॥ओं श्रमस्यश्री चण्डिकामाहात्म्यसप्तशतीयच

रित्रस्य ॥ पुराशुंभनिशुंभाभ्यामिति मंत्रस्य रुद्र ऋषिर्महासरस्वती देवता अनुष्टुप्छंदः भीमा शक्तिः भ्रामरी
बीजं सूर्यस्तत्त्वं ॥ महासरस्वतीप्रीत्यर्थं धर्मार्थकाममोक्षार्थं पाठे विनियोगः ॥ यथावत्कथयामीति मुनिना
नमितिहाससमाह ॥ ऋषिरुवाच ॥ पुरेति ॥ कश्यपाद्दन्वामनन्तमात्र शुचिरेषां शुंभनिशुंभाविमौ समालक्ष्योचेति
वामनपुराणे लक्ष्मीतंत्रेऽपि नाम महिनिवेश्यामहाविद्याभिधायगा ॥ मारीदहासमनु नाकोपि कीर्तिं नदाश्रहृव
शापयुक्तं दैत्यानां नया शुंभनिशुंभयोः मदीयाः शक्तयो या या देवस्पृष्टाः शरीरगाः तावत्सरूपदासिण्यः साम
थ्याविदधुर्मम ताभिर्निहत्य दैत्येंद्रान् हत्वा मेयथा नयानसंहृत्यात्मनि स्वशीसमदीयाय वपुषाऽखिला ॥ अहं १

पुराशुंभनिशुंभाभ्यामसुराभ्यां शचीपतेः ॥ त्रैलोक्यं यज्ञभागाश्च हृता मदबलाश्रयात् ॥ १ ॥ तावेव सूर्य
तांतद्वदधिकारं तथैंदवं ॥ कौबेरमथ याम्यं च चक्राते वरुणस्य च ॥ २ ॥ तावेव पवनर्द्धिं च चक्रतु
र्वह्निकर्म च ॥

नित्यं पृथ्वीपश्चाद्दैत्यौ शुंभनिशुंभकाविति ॥ नारायणीस्तुतिर्नाम सूक्तं परमशोभनं ॥ पुरंदरं तदा हृष्टं देवैर
ग्निपुरोगमैः ॥ एषामसूं जिताभक्तिर्यामवेत्तानंतमयक्लृप्ति ॥ कौशिकी सर्वदेवेशा सर्वकामप्रदस्य ह ॥ इन्द्राग्निपुर
विकाशिं स्तुति श्रीनिपुराणतेः पद्युते चिंतयविशेषं देवदानवापारगे ॥ एनामापरमाभोक्ताहृष्टस्यासामहीयसी
महालक्ष्मीर्महाभागा प्रकृतिः परमेश्वरी ॥ अमुष्याः स्तुतये हृष्टब्रह्माद्यैः सकलैः सुरैः ॥ नमो देव्या इति कं ॥ देवी
सकलसर्वफलप्रदे ॥ इमां देवीं स्तव वा नित्यं स्तोत्रेणानेन मामिह ॥ कृत्वा नतीन् सकलानां स्पर्शे स हृदयं श्रुतेः ॥ यज्ञभा

सर्वभूतेषु जगति माया ॥ देवाऊचुः ॥ नमस्ते

वैष्णवस्मरणेन परां सिद्धिमवाप्नुवन्ति ॥ अभिप्रायस्तु देवगणाः शुंभनिशुंभेन नारायणीमस्तुवन् ॥ तत्र नारायणि नमोस्तु ते इ
ति बहुधाभ्यासात् ॥ नमो देव्यै इत्यादिकं देवीसूक्तं ॥ देवीपदं लोपक्रमादित्रिवाक्यम् ॥ मदो गर्वः बलं शक्तिः
२॥ तावेति ॥ स्ववतिकर्मणि लोकान्तरेष्वयोनानिस्तः यज्ञस्यभावः सर्वलोककर्म प्रेरकनानतऽन्यं पद्दवम

ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः ॥३॥ हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः ॥ महासुरा
भ्यां तां देवीं संस्मरन्त्यपराजितां ॥४॥ तयास्माकं वरो दत्तो यथापत्सु स्मृताखिलाः ॥ भवतां नाशयि
ष्यामि तत्क्षणात्परमापदः ॥५॥ इति कृत्वा मतिं देवा हिमवन्तं नगेश्वरं ॥ जग्मुस्तत्र ततो देवीं विष्णु
मायां प्रतुष्टुवुः ॥६॥ देवा ऊचुः ॥ ॐ नमो देव्यै महादेव्यै शिवायै सततं नमः ॥

धिकारं तथा कौबेरं च कर्मागस्य चाधिकारमित्यन्वयः ॥ तावेवेति ॥ पवनाः ऋत्व्ये नेनेतिकरणे क्रिः अनेन
तदधिकारमित्यर्थः ॥ विनि धूताः कंपिताः अतः परैः आसर्वतो जिताः संतो भ्रष्टराज्या इत्यर्थः ॥३॥ हृतेति
आत्मसात्कृतेत्यर्थः ॥ अधिकारास्त्रिधा हृताः दश त्रिदशाः व्यधिकाराः तत्र पार्थो न भोवत्येकार्थाभावः ॥ तेन त्रयस्त्रिं
शादित्यर्थः ॥ ते चाष्टौ वसवः द्वादश आदित्या विश्वेदेवा द्वाविति ॥ एक एव त्रिशतः कल्पा त्रिगुणो भार्यायां ॥ निराकृताः
स्वर्गादपि निःसारिता ॥ संस्मरंति स्मरन्ति वत्त ॥ वर्तमानसमीपे लट् ॥४॥ तत्र हेतुमाह ॥ तयेति ॥ स्मृता सती अखि
लाः परमापद इत्यन्वयः ॥५॥ इतीति ॥ भवान्या अभ्यवाभ्यां स्थानमाद्धिमवद्गमनं ॥ तत्र हिमवति शुंभनिशुंभवद्दम

[illegible]

श्री
पं. ३.
टी.
३.

देवीत्युत्पादिमती महादेवी॥ महतां ब्रह्मादीनामपि देवानां सर्गादिव्यवहारप्रवर्तयित्री॥ शिवा मंगलरूपा॥ प्रकृत्यै
सहितशान्त्यै॥ भद्रा रक्षणशक्तिः॥ नियताः समाहितचित्ताः प्रणताः प्रणाम्राः स्म सन्निपादस्मरणे॥ ७॥ रौद्रायै रौद्र॥
महारूपायै नित्या कालानवच्छिन्ना नित्यारव्यशक्तिरूपा च॥ गौरी तद्वर्णा धात्री जगदाधारा ज्योत्स्ना चंद्र
किरणाः इन्दुश्चंद्र॥ इदमुपलक्षणं ज्योतीरूपत्वस्य सुखाय परमानंदरूपा॥ ८॥ कल्याण्यै नि॥ कल्याणी॥ वृद्धि

नमः प्रकृत्यै भद्रायै नियताः प्रणताः स्म ताम्॥ ७॥ रौद्रायै नमो नित्यायै गौर्यै धात्र्यै नमो नमः॥ ज्योत्स्ना-
यै चेन्दुरूपिण्यै सुखायै सततं नमः॥ ८॥ कल्याण्यै प्रणता वृद्ध्यै सिद्ध्यै कुर्मो नमो नमः॥ नैरृत्यै भू-
भृतां लक्ष्म्यै शर्वाण्यै ते नमो नमः॥ ९॥ दुर्गायै दुर्गपारायै सारायै सर्वकारिण्यै॥ ख्यात्यै तथैव कृष्णायै
धूम्रायै सततं नमः॥ १०॥ अतिसौम्यातिरौद्रायै नतास्तस्यै नमो नमः॥ नमो जगत्प्रतिष्ठायै देव्यै कृ-
त्यै नमो नमः॥ ११॥

प्रणताः सिद्धिरणिमादिरष्टविधा प्रणताः नम्राः नमो नमः॥ कुर्मः इत्यन्वयः निरृतिर्निरलक्ष्मीः सार्थेणा॥ भद्रा ने
दैत्यैः रक्षःशक्तिः शर्वाणी शिवशक्तिः॥ दुर्गा यस्या॥ दुःखेन ज्ञेया यस्याः दुर्गे दुःखे अधिगमः पारः परिच्छेदो यस्यास्तस्यै
दुर्गं संसारान्यारे तारयतीति च सारो बल॥ तत्त्वं सर्वकारिण्यै सर्वजनने स्वतंत्रायै॥ प्रकृतिपुरुषयोर्भेदज्ञान
ख्यातिस्तद्रूपायै प्रसिद्धायै च कृष्णा तद्वर्णा कृष्णशक्तिः धूम्रा तद्वर्णा धूम्रशक्तिः॥ १०॥ अतीति॥ विद्यातेन
संसारनाशकत्वात् अतिसौम्या॥ अविद्यारूपेण संसारहेतुत्वात् अतिरौद्रा तस्यै नमो नमः अत्र तु शब्द एवकारेण ना-
नमः अन्वयः॥ जगत्प्रतिष्ठा॥ जगदुपादानकारणं जगदाधारश्च॥ देव्यै देवमाया कृतिः क्रिया॥ ११॥

येति ॥ विष्णुमायाम्मलाविद्ययेन शब्दिता सर्वाणिभूतेषु प्रतिपादिता ॥ नमस्तस्यै इति त्रिकेण ॥ कायिकवाचिकमानसि
कद्रूपनमस्कारत्रयं दर्शितं एवमग्रेपि ॥ १२ ॥ चेतना निर्विकल्पकं ज्ञानं चित्कृ क्रियानुध्यानेन ॥ १३ ॥ बुद्धिः सविक
ल्पकं ज्ञानं ॥ १४ ॥ निद्रा सुषुप्त्यवस्थाः स्वप्नावस्था च ॥ १५ ॥ क्षुधा भवजिहीर्षा ॥ १६ ॥ छाया संसारेण तापाभावः

या देवी सर्वभूतेषु विष्णुमायेति शब्दिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १२ ॥ या देवी स
र्वभूतेषु चेतनेत्यभिधीयते ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १३ ॥ या देवी सर्वभूतेषु बुद्धि
रूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १४ ॥ या देवी सर्वभूतेषु निद्रारूपेण संस्थि
ता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १५ ॥ या देवी सर्वभूतेषु क्षुधारूपेण संस्थिता ॥ नम
स्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १६ ॥ या देवी सर्वभूतेषु छायारूपेण संस्थिता ॥ नमस्तस्यै नमस्त
स्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १७ ॥ या देवी सर्वभूतेषु शक्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नम
स्तस्यै नमो नमः ॥ १८ ॥ या देवी सर्वभूतेषु तृष्णारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ १९
या देवी सर्वभूतेषु क्षान्तिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २० ॥ या देवी सर्व
भूतेषु जातिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २१ ॥

वर्णाश्रमादयः ॥ १७ ॥ शक्तिः कार्यजनन
सामर्थ्यं ॥ १८ ॥ तृष्णा भुक्तात्मीयस्यैकारेच्छा ॥ १९ ॥ क्षान्तिः सत्यपि सामर्थ्ये पकारिणि अपकारानिचिकीर्षा ॥ २० ॥

श्री
पं.टु.
टी.
३२

31

लज्जा सा कार्य विषयान्यज्ञानभीः ॥ २२ ॥ शांतिरिंद्रियसंयमः विषयोपरतिर्वा यः ॥ २३ ॥ श्रद्धा श्रुतावगुरौ ये आ
स्तिक्यवत्तं ॥ २४ ॥ कांतिः शोभा ॥ २५ ॥ लक्ष्मीर्धनादिसंपत् ॥ मोक्षप्राप्तिर्वा ॥ २६ ॥ वृत्तिर्जीविका सहवृत्ति

यादेवीसर्वभूतेषु लज्जारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २२ ॥ यादेवीस
र्वभूतेषु शांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २३ ॥ यादेवीसर्वभूतेषु
श्रद्धारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २४ ॥ यादेवीसर्वभूतेषु कांति
रूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २५ ॥ यादेवीसर्वभूतेषु लक्ष्मीरूपेण सं
स्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २६ ॥ यादेवीसर्वभूतेषु वृत्तिरूपेण संस्थिता ॥ नम
स्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ २७ ॥ यादेवीसर्वभूतेषु स्मृतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्त
स्यै नमस्तस्यै नमो नमः ॥ २८ ॥ यादेवीसर्वभूतेषु दयारूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै न
मो नमः ॥ २९ ॥ यादेवीसर्वभूतेषु तुष्टिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३० ॥
यादेवीसर्वभूतेषु मातृरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३१ ॥ यादेवीसर्वभूते
षु भ्रांतिरूपेण संस्थिता ॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥ ३२ ॥

श्च ॥ २७ ॥ स्मृतिरनुभूतविषयं ज्ञानं ॥ २८ ॥ द
यापरदुःखप्रहारणेच्छा ॥ २९ ॥ तुष्टिरधिगतान्याधिकानभिलाषः ॥ ३० ॥ मातापालयित्री मातृकाधिष्ठात्री दे

इंद्रियेति॥ याखिलेषु भूतेषु अंतर्यामिविधया स्थिता इंद्रियाणां ज्ञानकरणानां भूतानां च ज्ञानविषया ॥
णां सूक्ष्मस्थूलानां॥ अधिष्ठात्री प्रवर्तिका निवर्तिका च तस्यै व्याप्तिरूपायै देव्यै व्यापिकायै इत्य
र्थः॥३३॥ चितिः चयनं बुद्धिः॥३४॥ अत्र नमस्त्येनेन नमोतं मंत्रस्वरूपत्वं इत्युपलक्षणं सर्वमंत्रस्वरू
पत्वेति केचित्॥ अत्रायं संग्रहः॥ विष्णुमायाचेतनाबुद्धिनिद्रेक्षुधानयाछायाशक्तिस्तृष्णासा क्षां

इंद्रियाणामधिष्ठात्री भूतानां चाखिलेषु या॥ भूतेषु सततं तस्यै व्याप्त्यै देव्यै नमो नमः॥३३॥
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत्॥ नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः॥३४॥
स्तुता सुरैः पूर्वमभीष्टसंश्रयात्तथा सुरेंद्रेण दिनेषु सेविता॥ करोतु सा नः शुभहेतुरी॥
श्वरी शुभानि भद्राण्यभिहंतु चापदः॥३५॥ या सांप्रतं चोद्धतदैत्यतापितैरस्माभिरीशा च
सुरैर्नमस्यते॥

तिर्जातीनतः परे॥१॥ लज्जापुष्टितिततः श्रद्धा कान्तिर्लक्ष्मीस्ततः परा। वृत्तिस्मृतिर्दयाचैवतुष्टि
र्मातातनः परं॥२॥ भ्रांतिर्व्याप्तिश्चितिश्चेव त्रयोविंशतिसंख्यकाः। इतोधिकमतोऽर्षस्यात्मंत्रेका
त्यायने स्मृतं॥३॥ स्तुतेति॥ या शुभहेतुरीश्वरी सुरैर्ब्रह्मादिभिः पूर्वं स्तुता॥ तथा इंद्रियेणमहिषव
धे सन्यभीष्टस्य संश्रयात्प्राप्ते॥ दिनेषु प्रतिदिनं सेविता सा नः शुभानि भद्राणि आनिपातनः करोतु

पं. दु. टी. ३२

स्यापदस्मद्हं विनाशयतु ॥ ३५ ॥ येति ॥ सांप्रतं उद्धता ईशा दैत्यैरस्माभिः उद्धतदैत्यपीडितैः नमस्यते नम्यते
च ॥ केषां तत्क्षणमात्रेण नो नाशयति ॥ याच भक्तिनम्रशरीरैरस्माभिः स्मृता सती स्मृतिलग्ना एव नः सर्वापदो
हंति केवलं तत्क्षणमात्रेणैव नाशयति ॥ ३६ ॥ ऋषिरुवाच ॥ एवमिति ॥ नम्रदेवसंनिहते देशे ॥ हे राजन्न्यावे
नी ज्ञातुं व्याजेनायेयात्रोन्मिवसीयाप्तवनति पुष्कानां देवानामभिमान्यवैयर्थ्याविन्यर्थः ॥ ३७ ॥ तथा

या च स्मृता तत्क्षणमेव हंति नः सर्वापदो भक्तिविनम्रमूर्तिभिः ॥ ३६ ॥ ऋषिरुवाच ॥ एवं स्तवा
दियुक्तानां देवानां तत्र पार्वती ॥ स्नातुमभ्याययौ तोये जाह्नव्या नृपनंदन ॥ ३७ ॥ साब्रवीत्तान्सु
भ्रूर्भवद्भिः स्तूयतेऽत्र का ॥ शरीरकोशतश्चास्याः समुद्भूताब्रवीच्छिवा ॥ ३८ ॥ स्तोत्रं ममैतत्क्रि
यते शुंभदैत्यनिराकृतैः ॥ देवैः समेतैः समरे निशुंभेन पराजितैः ॥ ३९ ॥ शरीरकोशाद्यत्त
स्याः पार्वत्या निःसृताम्बिका ॥ कौशिकीति समस्तेषु ततो लोकेषु गीयते ॥ ४० ॥

तथापि तेषामज्ञानं द्रष्टुं कास्तूयत इति पृच्छति ॥ सेति ॥
कामदन्यास्तूयते यस्मान्नाभिभावयमदन्यायाः अभावादिति भावः ॥ ततो ज्ञानमेव द्रष्टुं तेषां दययाब्र
यमब्रवीत् अस्यास्तु स्तुतिः ॥ एतज्ज्ञानेऽपि निःशेषः ॥ शरीरं तु पार्वत्याः कोशतो रूपात्समुद्भूता सत्प्रधाना शोभन
प्रधानाद्भूता ॥ तत एव शिवः अब्रवीदित्यर्थः ॥ ३८ ॥ किमब्रवीत् तदाह स्तोत्रमिति समेतैर्मिलितैः ॥ रणे
निशुंभेन पराजितैः ॥ अत एव शुंभेन निराकृतैः स्वर्गादिति शेषः ॥ ३९ ॥ शरीरेति ॥ यच्च निर्गता तेन कौशिकी

ति गीयत इत्यन्वयः कौशिकीति नाम लब्धमर्थं तच्छरीरमूलशक्तिरेवै
वंरूपेण निर्गतेति बोध्यं ॥ ४० ॥

तस्यामिति॥ तस्याः भिन्नायां सैवाम्बिका॥ पूर्वं तु रक्तवर्णा॥ इह तु कृष्णवर्णा पार्वती॥ गौरीति तु नाममात्रं॥ पार्वत्याः गौरवर्णा कौशिकी कायान्निर्गता गौरी जिनामनस्याः इति बोध्यं॥ अम्बिकाया स्थानं॥ तदुक्तं वैकृतिके रहस्ये॥ गौरीदेहात्समुद्भूता या सत्त्वैकगुणाश्रया॥ साक्षात्सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी॥ दधौ चाष्टभुजा बाणमुसले शूलचक्रभृत्॥ शंखं घंटां लांगलं च कार्मुकं वसुधाधिप॥ एषा संपूजिता भक्त्या सर्वज्ञत्वं प्रयच्छतीति॥ शिव॰पुराणे संहितायां॥ दैत्यौ शुम्भनिशुम्भाख्यौ भ्रातरौ संबभूवतुः॥ याचितेन पद्मनाभेन ब्रह्मणः परमेष्ठिना॥ सर्वभूतं जगत्यस्मिन्पुरुषैरखिलैरपि॥ अयोनिजा तु या कन्या ह्यगकोशसमुद्भवा अज्ञातपुंस्पर्शा रतिरविलंघ्यपराक्रमा॥ तया तु नौ वधः संख्ये तस्याः कामाभिभूतयोः॥ इति चाभ्य-

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती॥

र्थितो ब्रह्मणा नाभ्यां प्राह तपस्वेति॥ ततस्ताभ्यां जगत्त्रितयं पीडितं॥ तयोर्वधाय देवेशं ब्रह्मा प्रार्थितवाञ्छिव॥ विनिर्याय पिरहस्यं वा क्रोधयित्वा यथा तपः॥ तद्वर्णकोशजां शक्तिमकामां कन्यकामिका॥ निशुम्भशुम्भयोर्हन्त्री देवेभ्यो दातुमर्हसि॥ एवमभ्यर्थितो धात्रा भगवान्नीललोहितः॥ कालीत्याह रहस्येवाम्बिकां कृत्वा तां दृष्ट्वा क्रीडार्थं कालीत्युक्तमिति शिवेनोक्तं॥ अपमानवाभीतिरेगौरमितिमेवपुः॥ क्रीडाक्षिरपिकालीति चाटे निकथमन्यथेति॥ देवीवचनमुपश्रुत्य कथंचिदेवाज्ञया देवी गौतमाश्रमे प्राप्य तपश्चरित्वा रजोगुणाधिकात्॥ ब्रह्मणो गौरं रूपं प्राप्य नीलकोशमुत्सृष्टवती॥ ततः कोशात्तदुत्पन्ना कौशिकी का-

पं
दु. टी.
२२

33

के ॥ तत्कोशे सहसोत्पन्ना गौरी सा समजायत ॥ तत्कोशाद्यात्मनोत्सृष्टा कौशिकी नाम नामतः ॥ कोशात्कालांबु
धप्रख्या कन्यका समजायत ॥ सा तु मायात्मिका शक्तिर्योगनिद्रा हरेः स्मृतेति ॥ ततः प्रत्यागतया देव्या ॥ देवा
न्प्रति कौशिकीमहिमा कथितः ॥ किं देवेन तत्सा दृष्टा या दृष्टा कौशिकी मया तादृशी कन्यका लोके न भूता न भवि
ष्यति ॥ अज्ञातपुंस्पर्शा रतिरथ्यायाचातिसुंदरीति ॥ यस्याः शरीरकोशात्दिव्यं निर्गता सा मातंगी ॥ यानिः स्तनासै
वा तदा ॥ उग्रादपि भयात्त्राणीन्यतः इति कालिका पुराणे सम्बन्धः ॥ तथा ॥ या कायकोशात्कृष्टा ॥ कालिकाया

कालिकेति समाख्याता हिमाचलकृताश्रया ॥४१॥ ततोऽम्बिकां परं रूपं बिभ्राणां सुमनोहरं ॥ ददर्श चंडो मुं
डश्च भृत्यौ शुंभनिशुंभयोः ॥४२॥ ताभ्यां शुंभाय चाख्याता अतीव सुमनोहरा ॥ काप्यास्ते स्त्री महाराज
भासयंती हिमाचलं ॥४३॥ नैव तादृक् क्वचिद्रूपं दृष्टं केनचिदुत्तमं ॥ ज्ञायतां काप्यसौ देवी गृह्यतां चासु
रेश्वरः ॥४४॥ स्त्रीरत्नमतिचार्वंगी द्योतयंती दिशस्त्विषा ॥ सा तु तिष्ठति दैत्येंद्र तां भवान् द्रष्टुमर्हति
यानि रत्नानि मणयो गजाश्वादीनि वै प्रभो ॥ त्रैलोक्ये तु समस्तानि सांप्रतं तानि ते गृहे ॥४६॥

शुंभैरवा सा कौशिकी निःसृत्याख्याता चारुरूपा मनोहरेति चतचैव ॥४१॥ तत इति परमुत्कृष्टं ॥४२॥ ताभ्यामिति
शुंभायेति क्रियायाप्यभिप्रेतीति संप्रदानत्वे काप्यास्ति वा ॥ नैवेति ॥ असौ देवी कापि ॥ अतो ज्ञायतां मनुष्य
द्दारा तत्स्वरूपं विचार्य तां दृष्ट्वा तोऽव गृह्यतां किंतु नो च ॥४४॥ ननु किमर्थं तोकारस्तस्याः अन्यत आह ॥ स्त्रीरत्न
मिति ॥ उत्तमस्त्रीरत्नार्थं ॥ भवान् तां द्रष्टुमर्हति ॥ सा तव दर्शनयोग्यायतो. तोंगी क्रियतामिति भावः ॥ नन्वहेतो
एवं च समस्तरत्नानि यतस्तव गृहे. तत्तस्यमपि तव भविष्यत्येवेति भावः ॥४६॥

नदेवविहगणेति॥ ऐरावत इति॥ ४७॥ विमानमिति॥ वेधसो ब्रह्मणः सकाशादिह मानमानीतं तदद्भुतं एवं चांऽगे
नव निधिकलाज्ञप्यन्तस्सू चितं॥ आनीतं तवलाघवतरुद्रत्नं सदनवरत्नाद्धनेनापेत्तिनऽनिरुद्धय निधिरिति।
किंजल्किनीनाम्नामिकादत्ताविन्यस्य भयादि निषेधः॥ ४९॥ छत्रमिति॥ कांचनस्रावि स्वर्णवर्षणात्म।

ऐरावतः समानीतो गजरत्नं पुरंदरात्॥ पारिजाततरुश्चायं तथैवोच्चैःश्रवा हयः॥ ४७॥ विमानं
हंससंयुक्तमेतत्तिष्ठति तेंगणे॥ रत्नभूतमिहानीतं यदासीद्वेधसोद्भुतं॥ ४८॥ निधिरेष महापद्मः
समानीतो धनेश्वरात्॥ किंजल्किनीं ददौ चाब्धिर्मालामम्लानपंकजां॥ ४९॥ छत्रं ते वारुणं गेहे
कांचनस्रावि तिष्ठति॥ तथायं स्यंदनवरो यः पुरासीत्प्रजापतेः॥ ५०॥ मृत्योरुत्क्रांतिदा नाम श-
क्तिरीश त्वया हृता॥ पाशः सलिलराजस्य भ्रातुस्तव परिग्रहे॥ ५१॥ निशुंभस्याब्धिजाताश्च
समस्ता रत्नजातयः॥ वह्निरपि ददौ तुभ्यमग्निशौचे च वाससी॥ ५२॥

ले॥ प्रजापतेर्ब्रह्मणः॥ अयं रिपूणामजेय॥ ५०॥ मृत्योरिति॥ उत्क्रांतिर्मरणं॥ परिग्रहे परिजने करणभूत्य
त्या हृतेवा॥ ५१॥ निशुंभसेति॥ अब्धिजाता रत्नजातयश्च निशुंभस्य परिग्रह इत्यर्थः॥ अग्निशौचे अग्निरिव
शौचं नैर्मल्यकरणं ययोरित्यर्थः॥ कल्पवृक्षदीपकल्पितामदेवत्यमग्निप्रदोयायतेमलेवासोयुग्मं॥ अ-
ग्निशौचमाहुः॥ ५२॥

पं
दु॰टी॰
३४

एवमिति ॥ नेद्रति कस्मैः पोषत विवक्षायां षष्ठी ॥ ५३ ॥ ऋषिरुवाच ॥ निशम्येति ॥ सुग्रीवं तन्नामानं ॥ ५४ ॥ इती
चेति ॥ इदं चेत्यर्थः वक्ष्यमाणस्वगुणानमशीः ॥ अनेन शुंभनिशुंभयो रज्ञो गुणमयत्वं सूचयति ॥ अनयैव नद्दृष्टा
र्थं स्वगुणप्रधानो वचनादति बोध्यम् ॥ लघु शीघ्रं ॥ ५५ ॥ सेति ॥ स दूतः ततः शुंभसकाशात् ॥ यत्र शैलो
देशे सा देवी आस्ते तत्र गत्वा श्लक्ष्णं [illegible] कटमधुरया कोमलया गिरा प्राह इत्यन्वयः ॥ ५६ ॥ दूत उवाच ॥
देवीति ॥ न केवलं दैत्येश्वर एव किं तु त्रैलोक्यस्य परमेश्वर इत्यर्थः ॥ सकाशं समीपं ॥ ५७ ॥ न देवो पपा

एवं दैत्येंद्ररत्नानि समस्तान्याहृतानि ते ॥ स्त्रीरत्नमेषा कल्याणी त्वया कस्मान्न गृह्यते ॥ ५३ ॥
ऋषिरुवाच ॥ निशाम्येति वचः शुंभः स तदा चंडमुंडयोः ॥ प्रेषयामास सुग्रीवं दूतं देव्या महा
सुरं ॥ ५४ ॥ इति चेति च वक्तव्या सा गत्वा वचनान्मम ॥ यथा चाभ्येति संप्रीत्या तथा कार्यं त्वया ल
घुः ॥ ५५ ॥ स तत्र गत्वा यत्रास्ते शैलोद्देशेऽतिशोभने ॥ सा देवी तां ततः प्राह श्लक्ष्णं मधुरया गि
रा ॥ ५६ ॥ दूत उवाच ॥ देवि दैत्येश्वरः शुंभस्त्रैलोक्ये परमेश्वरः ॥ दूतोहं प्रेषितस्तेन त्वत्सकाश
मिहागतः ॥ ५७ ॥ अव्याहताज्ञः सर्वासु यः सदा देवयोनिषु ॥ निर्जिताखिलदैत्यारिः स यदाह
शृणुष्व तत् ॥ ५८ ॥ मम त्रैलोक्यमखिलं मम देवा वशानुगाः ॥ यज्ञभागानहं सर्वानुपाश्नामि
पृथक्पृथक् ॥ ५९ ॥ त्रैलोक्ये वररत्नानि मम वश्यान्यशेषतः ॥ तथैव गजरत्नं च हृत्वा देवेंद्र

दयति ॥ अव्याहतेति ॥ देवयोनिषु तदाख्यगणेषु ॥ ५८ ॥ तदुक्तिमाह ममेति वशानुगा एवानुगा इत्यर्थः
पृथक्पृथक् इन्द्राद्यधिकारिभेदेन ॥ ५९ ॥ त्रैलोक्य इति अशेषतः अशेषाणि हृत्वेत्यादायुत्तरेणान्वयः ॥ ६० ॥

क्षीरोदेति ॥ नदस्थात्तं हृत्वा ग्राद्रुलाकारेणाश्वहीनाश्वममैः प्रणिपत्य समर्पितमित्यर्थः ॥ उच्चैःश्रवसेनच एष क्षी
रोदधिजातादुद्गमः ॥ ६१ ॥ यानीति ॥ रत्नभूतानि भूतानि रत्नरूपाणि स्थितानीत्यर्थः ॥ ६२ ॥ स्त्रीति ॥ वयमि
त्यात्मगौरवे बहुवचनं ॥ ६३ ॥ मां वेति ॥ उरुविक्रमं ॥ महाविक्रमं वैश्रसिद्धौ ॥ ६४ ॥ परमेति ॥ प्राप्स्यसेर

क्षीरोदमथनोद्भूतमश्वरत्नं ममामरैः ॥ उच्चैःश्रवससंज्ञं तत्प्रणिपत्य समर्पितं ॥ ६१ ॥ यानि चान्यानि
देवेषु गंधर्वेषूरगेषु च ॥ रत्नभूतानि भूतानि तानि मय्येव शोभने ॥ ६२ ॥ स्त्रीरत्नभूतां त्वां देवि लोके
मन्यामहे वयं ॥ सा त्वमस्मानुपागच्छ यतो रत्नभुजो वयं ॥ ६३ ॥ मां वा ममानुजं वापि निशुंभमुरु
विक्रमं ॥ भज त्वं चंचलापांगि रत्नभूतासि वै यतः ॥ ६४ ॥ परमैश्वर्यमतुलं प्राप्स्यसे मत्परिग्रहा
त् ॥ एतद्बुद्ध्या समालोच्य मत्परिग्रहतां व्रज ॥ ६५ ॥ ऋषिरुवाच ॥ इत्युक्ता सा तदा देवी गंभीरांतः
स्मिता जगौ ॥ दुर्गा भगवती भद्रा ययेदं धार्यते जगत् ॥ ६६ ॥ देव्युवाच ॥ सत्यमुक्तं त्वया नात्र मि
थ्या किंचित्त्वयोदितं ॥ त्रैलोक्याधिपतिः शुंभो निशुंभश्चापि तादृशः ॥ ६७ ॥ किं त्वत्र यत्प्रतिज्ञातं
मिथ्या तत्क्रियते कथं ॥ श्रूयतामल्पबुद्धित्वात्प्रतिज्ञा या कृता पुरा ॥ ६८ ॥

त्यक्तं दसमलड्ड ॥ मत्परिग्रहात् ॥ मदाश्रयात् ॥ समालोच्य विचार्य ॥ मत्परिग्रहतां ॥ मत्पत्नीत्वं ॥ ६५ ॥ ऋषिरु
वाच ॥ इतीति ॥ अंतःस्मितं तेन सावहेलनमनंतरं सूचितं ॥ ६६ ॥ देव्युवाच ॥ सत्यमिति ॥ अत्र शुंभविषये त्रै
लोक्याधिपतिसमस्तं ॥ ६७ ॥ किंत्विति ॥ अत्र परिग्रहत्वविषये ॥ अल्पबुद्धित्वादिति ॥ संभवाय ॥ प्रतिज्ञा हानोच

पं
उ॰टी
३५

प्रतिज्ञानमाह॥ योमामिति॥ जयति॥ संग्रामातिरिक्तेनापिप्रकारेण॥ संग्रामेयोमेदर्पंबलवत्वाभिमानंव्यपो
हति॥ यस्मेप्रतिबलः समानबलः पुंभाव॥ उत्तरः शास्त्रतत्ववशापद्येति॥ गूढआशयः॥ ६९॥ तदे
तिपाणिग्रहणानुकूलंममगमनुचिंतमितिभावः॥ ७०॥ दूतउवाच॥ अवलिप्तेति॥ अवलेपोगर्वः॥ एवंमागृ

योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति॥ योमेप्रतिबलोलोकेसमेभर्ताभविष्यति॥ ६९॥ तदाग
च्छतुशुंभोत्रनिशुंभोवामहासुरः॥ मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु॥ ७०॥ दूतउवा
च॥ अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः॥ त्रैलोक्येकः पुमांस्तिष्ठेदग्रेशुंभनिशुंभयोः॥ ७१॥
अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि॥ तिष्ठंतिसंमुखेदेविकिंपुनः स्त्रीत्वमेकिका॥ ७२॥ इंद्रा
द्याः सकलादेवास्तस्थुर्येषांनसंयुगे॥ शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखं॥ ७३॥ सात्वंग
च्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः॥ केशाकर्षणनिर्धूतगौरवामागमिष्यसि॥ ७४॥ देव्युवाच॥
एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान्॥ किंकरोमिप्रतिज्ञामेयदनालोचितापुरा॥ ७५॥ स
त्वंगच्छमयैवोक्तंयदेतत्सर्वमादृतः॥ तदाचक्ष्वासुरेंद्रायसचयुक्तंकरोतुयत्॥ ७६॥

के॥ यदग्रेपुमानपिननतिष्ठेत्तदग्रेस्त्रीनतिष्ठेदितिभावः॥ ७१॥ तत्रहेतुर्देवीत्वतः प्राबल्यमीत्यतआह॥ अन्येषाम
पीतिद्वयं॥ एकिकेति कुत्सायामकप्र॥ ७२॥ ७३॥ उपसंहरति॥ सात्वमिति॥ मयैवयुक्तंत्वंनात्यागमने॥ तेषां
सर्वेषांगृहीतयागौरवंनतिष्ठेदित्यर्थः॥ तदेवविपक्षेबाधकमाह॥ केशाकर्षणेननिर्धूतंखंडितंगौरवंयस्या
स्ताद्दशीमागमिष्यसि॥ ७४॥ प्रतिज्ञामानस्थंसकाकुप्र॥ ७५॥ देव्युवाच॥ एवमेतदिति॥ सोपहासंवचनः प्रतिज्ञेय

इति सप्तशतीव्याख्याने पंचमोध्यायः ॥५॥ ऋषिरुवाच ॥ इतीति ॥ अमर्षः कोपः ॥ समाचष्ट अकथयत् ॥१॥ तस्येति
दैत्यानामधिपं सेनापतिं ॥२॥ हे इति ॥ दुष्टां दुर्वचनादिदुष्टां विह्वलां आकुलां ॥३॥४॥ ऋषिरुवाच ॥ तेनेति सहस्रा॥

इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमहात्म्ये निशुंभवधः पंचमोध्यायः ५ श्लो॰ मंत्र ५९
ऋषिरुवाच ॥ इत्याकर्ण्य वचो देव्याः स दूतोऽमर्षपूरितः ॥ समाचष्ट समागम्य दैत्यराजाय विस्तरात् ॥१॥
तस्य दूतस्य तद्वाक्यमाकर्ण्यासुरराट् ततः ॥ सक्रोधः प्राह दैत्यानामधिपं धूम्रलोचनं ॥२॥ हे धूम्र-
लोचनाशु त्वं स्वसैन्यपरिवारितः ॥ तामानय बलाद्दुष्टां केशाकर्षणविह्वलां ॥३॥ तत्परित्राणदः
कश्चिद्यदि वोत्तिष्ठते परः ॥ स हन्तव्योऽमरो वापि यक्षो गंधर्व एव वा ॥४॥ ऋषिरुवाच ॥ तेनाज्ञप्त-
स्ततः शीघ्रं स दैत्यो धूम्रलोचनः ॥ वृतः षष्ट्या सहस्राणामसुराणां द्रुतं ययौ ॥५॥ स दृष्ट्वा तां ततो देवीं
तुहिनाचलसंस्थितां ॥ जगादोच्चैः प्रयाहीति मूलं शुंभनिशुंभयोः ॥६॥ न चेत्प्रीत्याद्य भवती मद्भर्ता-
रमुपैष्यति ॥ ततो बलान्नयाम्येष केशाकर्षणविह्वलां ॥७॥ देव्युवाच ॥ दैत्येश्वरेण प्रहितो ब-
लवान्बलसंवृतः ॥ बलान्नयसि मामेवं ततः किं ते करोम्यहं ॥८॥ ऋषिरुवाच ॥

णामसुराणां षष्ट्या सहस्रैः ॥५॥ स इति ॥ तुहिनं हिमं मूलं समीपम् ॥६॥ विपदेवाथ कमाह ॥ नचेदि-
ति ॥ नयसीत्यर्थः ॥७॥ देव्युवाच ॥ दैत्येश्वरेणेति ॥ एवं केशाकर्षणविह्वला बलं सामर्थ्यं सेना च ॥ सा वहं भोक्ति

सप्तशतीटी॰ ॥ ९ ॥

इतीति तं सा भस्म चकारेत्यर्थः ॥ ९ ॥ अथेति ॥ अंबिकाकर्त्री ॥ अत एव ततथापदस्मादस्माम् ॥ १० ॥ ततो धुतकेसरेत्य
देव्याः प्रयाणसाम्यार्थः इति मत्वा सिंहो प्रयुधे ॥ तत इति ॥ न च हेतुगर्भं विशेषणं स्ववाहन इति ॥ अर्थवादितो
त्युक्तं ॥ स्वीयवाहन इत्यर्थः ॥ पपातमाविशत ॥ ११ ॥ कांश्चिदिति ॥ स सिंहः आक्रांतिराक्रमणं तेन ॥ अ

इत्युक्तः सोभ्यधावत्तामसुरो धूम्रलोचनः ॥ हुंकारेणैव तं भस्म सा चकारांबिका ततः ॥ ९ ॥
अथ क्रुद्धं महासैन्यमसुराणां तथांबिका ॥ ववर्ष सायकैस्तीक्ष्णैस्तथा शक्तिपरश्वधैः ॥ १० ॥
गुग्गुलेहोमः ततो धुतसटः कोपात्कृत्वा नादं सुभैरवं ॥ पपातासुरसेनायां सिंहो देव्याः स्ववाहनः ॥ ११ ॥
कांश्चित्करप्रहारेण दैत्यानास्येन चापरान् ॥ आक्रान्त्या चाधरेणान्यान्स जघान महासुरान् ॥ १२ ॥
केषांचित्पाटयामास नखैः कोष्ठानि केसरी ॥ तथा तलप्रहारेण शिरांसि कृतवान्पृथक् ॥ १३ ॥
विच्छिन्नबाहुशिरसः कृतास्तेन तथापरे ॥ पपौ च रुधिरं कोष्ठादन्येषां धुतकेसरः ॥ १४ ॥ क्षणेन
तद्बलं सर्वं क्षयं नीतं महात्मना ॥ तेन केसरिणा देव्या वाहनेनातिकोपिना ॥ १५ ॥ चुकोप
दैत्याधिपतिः शुंभः प्रस्फुरिताधरः ॥ आज्ञापयामास च तौ चंडमुंडौ महासुरौ ॥ १६ ॥ श्रुत्वा तम्
असुरं देव्या निहतं धूम्रलोचनं ॥ बलं च क्षयितं कृत्स्नं देवीकेसरिणा ततः ॥ १७ ॥

धरेण अधरकायेनाथ रोहेन चान्यान्महासुराञ्जघानेत्यन्वयः ॥ १२ ॥ केषामिति ॥ कोष्ठानि उदरमध्यानि
तलो विस्तृतांगुलिः पाणिः ॥ १३ ॥ १४ ॥ १५ ॥ क्षणेनेति ॥ क्षयितमिति ॥ क्षयशब्दात्ख्यानमणेनाक्तः कृतवत्

36

हे चंडेति ॥ बहुलैर्बहुभिरित्यर्थः ॥ गच्छत गच्छतं कुं देतो गेषाद्वित्व लोपः लघु शीघ्रं ॥१८॥ आनयनेप्रकारद्वयमाह कें
शेन ॥ केशेष्विति ॥ आकर्षणमाकाद्वतागमनेनच इति गौरवाद्बहुवचनं ॥ सेनाभिप्रायं वा ॥ नयानमहयुद्धे प्रस ॥
क्तेयदि तथानयने संदेहस्तदा सर्वैर्दैत्यैः सकलायुधैर्याविशेषेण निहन्यतामायेनामित्यर्थः ॥ उपसंहरति ॥ १९
तस्यामिति ॥ आगम्यतामित्यनेन सर्वथा गृहीत्वमशक्यावेदेयं हनव्यानन्यथेत्याह ॥ वद्ध्वेति ग्रथितिपदानेव

हे चंड हे मुंड बलैर्बहुलैः परिवारितौ ॥ तत्र गच्छत गत्वा च सा समानीयतां लघु ॥१८॥ केशेष्वाकृ-
ष्य बद्ध्वा वा यदि वः संशयो युधि ॥ तदाशेषायुधैः सर्वैरसुरैर्विनिहन्यतां ॥१९॥ तस्यां हतायां दु-
ष्टायां सिंहे च विनिपातिते ॥ शीघ्रमागम्यतां बद्ध्वा गृहीत्वा तामथांबिकां ॥२०॥ इति मार्कंडेय-
पुराणे सावर्णिके मन्वंतरे श्रीदेवीमहात्म्ये धूम्रलोचनवधः ॥६॥ ऋषिरुवाच ॥ आज्ञप्तास्ते
ततो दैत्याश्चंडमुंडपुरोगमाः ॥ चतुरंगबलोपेता ययुरभ्युद्यतायुधाः ॥१॥ ददृशुस्ते ततो देवीमी-
षद्धासां व्यवस्थितां ॥ सिंहस्योपरि शैलेंद्रशृंगे महति कांचने ॥२॥ श्लो २० मंत्रा २४ ॥

दिशकत्वेन तर्हि वध्यावां गृहीत्वेवागंतव्यमित्यर्थः ॥ धूम्रलोचनहंत्र्येव धूम्रावती ॥२०॥ इति शिवभट्टसुत-
सतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने षष्ठोध्यायः ॥६॥ ऋषिरुवाच ॥ आज्ञप्ता इति ॥१॥
ददृशुरिति ॥ शैलेंद्रशृंगे हिमाचलशृंगे सिंहस्योपरिस्थितामित्यन्वयः ॥ रमायनमः ॥ २ ॥ २

स॰
उ॰टी॰
३८

37

तेऽपीति॥चंडादयःससैन्याःसमादातुंग्रहीतुं॥उद्यमं॥उद्योगंउद्यताः॥उत्साहवंतोजाताः॥आकृष्टे॥कर्णां
तंकृष्टे॥कोशादुद्धृतश्चतत्समीपगाः॥ग्रहीतुमुद्यतानांरक्षणार्थंसमीपगाइत्यर्थः॥३॥अनेनचंडादीनां
मपितामसत्वंधर्षितं॥अतस्तद्धर्षणमितिज्ञात्वासाआह॥ततइति॥समीलिपिसादनकृत्येन
हतंयणासवर्णं॥निःसरत्कालीमसीनिर्विवादितिभावः॥४॥भ्रूकुटीति॥तस्याःकुपितदेव्याःविनिष्क्रांतानिःस

तेदृष्ट्वातांसमादातमुद्यमंचक्रुरुद्यताः॥आकृष्टचापासिधरास्तथान्येतत्समीपगाः॥३॥ततः
कोपंचकारोच्चैरंबिकातानरीन्प्रति॥कोपेनचास्यावदनंमसीवर्णमभूत्तदा॥४॥भ्रूकुटीकु
टिलात्तस्याललाटफलकाद्रुतं॥कालीकरालवदनाविनिष्क्रांतासिपाशिनी॥५॥विचित्र
खट्वांगधरानरमालाविभूषणा॥द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा॥६॥अतिविस्तार
वदनाजिह्वाललनभीषणा॥निमग्नारक्तनयनानादापूरितदिङ्मुखा॥७॥सावेगेनाभिपति
ताघातयंतीमहासुरान्॥सैन्येतत्रसुरारीणामभक्षयततद्बलं॥८॥

ता॥५॥विचित्रेति॥खट्वांगंपट्टिकांकंकालवटिकांकंकालपंजरास्थिवाननरमालेत्यत्रैनरशब्दस्तुलुंडेला
त्तणिकः॥द्वीपीव्याघ्रः॥शुष्कमांसातिमांसदेहा॥अतएवातिभैरवा॥६॥अतीति॥अतिशयितोविस्तारो
यस्यतादृशंवदनंयस्याइत्यर्थः॥ललनंचालनं॥निमग्नानिनिम्नप्रविष्टानिनयनानियस्याःत्रिनेत्रत्वात्॥७

पार्ष्णीति ॥ पार्ष्णिग्राहो गजपार्श्वरक्षकः अंकुशग्राही महामात्रः योद्धा गजारूढो वीरः ॥९॥ तथैवेति ॥ योधमिति जातावेकवचनं ॥ एवं रथमपरमन्यमित्यादावपि ॥ चर्वयंतीति ॥ वृत्तमानसामीप्ये लट् ॥ अतिभैरवमिति क्रियाविशेषणं ॥१०॥ एकमिति ॥ अपोथयत् अवधीत् ॥११॥ तैरिति ॥ मथितान्यपि मथितानि चकारेणास्यैः

पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान् ॥ समादायैकहस्तेन मुखे चिक्षेप वारणान् ॥९॥ त
थैव योधं तुरगै रथं सारथिना सह ॥ निक्षिप्य वक्त्रे दशनैश्चर्वयंत्यतिभैरवम् ॥१०॥ [illegible] एकं ज
ग्राह केशेषु ग्रीवायामथ चापरं ॥ पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत ॥११॥ तैर्मुक्तानि च शस्त्रा
णि म[illegible]स्त्राणि तथासुरैः ॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि ॥१२॥ बलिनां तद्बलं सर्वम
सुराणां महात्मनां ॥ ममर्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा ॥१३॥ असिना निहताः केचित्केचि
त्खट्वांगताडिताः ॥ जग्मुर्विनाशमसुरा दंताग्राभिहतास्तथा ॥१४॥ क्षणेन तद्बलं सर्वमसुरा
णां निपातितं ॥ दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां ॥१५॥ शरवर्षैर्महाभीमैर्भीमाक्षीं तां म
हासुरः ॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः ॥१६॥ तानि चक्राण्यनेकानि विशमानानि त
न्मुखं ॥ बभुर्यथार्कबिंबानि सुबहूनि घनोदरं ॥१७॥ ततो जहासातिरुषा भीमं भैरवनादिनी ॥ का
ली करालवक्त्रांतर्दुर्दर्शदशनोज्ज्वला ॥१८॥

बलिनामिति महात्मनां ॥ १३॥१४॥१५॥ शरेति ॥ चंडः शरवर्षैः सहस्रशः ॥ क्षिप्तैश्चक्रैः ॥ छादयामासेत्यन्वयः एवं चंडमुंडाभ्यां केचग्रहणे मुंडस्याशुभलक्षणं ॥१६॥ तानीति ॥ मुखं विशमानानि चक्राणि ॥ घनोदरं बिंबमा

स
दु॰टी॰
३८

38

उत्थाप्येति ॥ महासिंहं महारवं ॥ उत्थाप्य सकोपवारणं यथा स्यात्तथा हस्तिमुखा देवी चंडमधावत ॥ अस्य
चंडस्य तेनासिनेन ॥१९॥ अथेति खड्गाभिहतो यथा न खड्गाभिहतं ॥ अस्य शिरोन छिन्नं किंतु खड्गप्रहारमा-
त्रं ॥२०॥२१॥ शिरश्चेति ॥ मुंडं सशिरस्कं न तु हतमित्यर्थः ॥ प्रचंडाट्टहासेन मिश्रं युक्तं यथा भवति तथा प्रह्ला-

उत्थाप्य च महासिंहं देवी चंडमधावत ॥ गृहीत्वा चास्य केशेषु शिरस्तेनासिनाछिनत् ॥१९॥ अथ मुं-
डोभ्यधावत्तां दृष्ट्वा चंडं निपातितं ॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा ॥२०॥ हतशेषं ततः
सैन्यं दृष्ट्वा चंडं निपातितं ॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं ॥२१॥ शिरश्चंडस्य काली
च गृहीत्वा मुंडमेव च ॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां ॥२२॥ मया तवात्रोपहृतौ चंड
मुंडौ महापशू ॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यसि ॥२३॥ ऋषिरुवाच ॥ तावानीतौ ततो दृ-
ष्ट्वा चंडमुंडौ महासुरौ ॥ उवाच कालीं कल्याणी ललितं चंडिका वचः ॥२४॥ यस्माच्चंडं च मुं-
डं च गृहीत्वा त्वमुपागता ॥ चामुंडेति ततो लोके ख्याता देवि भविष्यसि ॥२५॥ इति सप्तशती चंड
मुंडवधः ॥७॥ सांगायै कर्पूरवीजाधिष्ठात्र्यै महाहुतिं समर्पयामि नमः स्वाहा ॥ श्लो ॥२५॥ मंत्रा २

दफलकावित्रिगंतानां देवी प्राहेत्यर्थः ॥२२॥ मयेति ॥ अत्र युद्धयज्ञे महापशू इति रूपकं ॥ उपहृतौ प्रदानां
गच्छारेण चंडमुंडोपहारः ॥२३॥ ऋषिरुवाच ॥ ताविति ॥ काली ललाटभवा ॥ कल्याणी नित्यं विशेषणं
चंडिका कौशिकी ॥२४॥ यस्मादिति चंडशिरोहारात् ॥ हते विख्याता भविष्यसीत्यन्वयः ॥ चामुंडे निरुषादरा

ऋषिरुवाच ॥ चंडे इति ॥ क्षयितेषु क्षतं नीतेषु ॥ १ ॥ ततः इति ॥ तेषां वधजकोपेन पराधीनचेताः ॥ अत एव स्त्रीवधेप्य
समर्थानिति भावः ॥ सर्वसैन्यानामिति ॥ दैत्यानां विशेषणं ॥ २ ॥ अद्येति ॥ उदायुधाः उद्यतायुधाः स्वसैन्यवृता
सु ॥ कंबूनां तन्नामकानां चतुरशीतिर्दैत्या इति शेषः ॥ ३ ॥ कोटीति ॥ कोटिवीर्याणि तन्नामानि ॥ धौम्राः धूम्रवं

ऋषिरुवाच ॥ चंडे च निहते दैत्ये मुंडे च विनिपातिते ॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥ १ ॥ ततः
कोपपराधीनचेताः शुंभः प्रतापवान् ॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥ २ ॥ अद्य सर्वबलै
र्दैत्याः षडशीतिरुदायुधाः ॥ कंबूनां चतुरशीतिर्निर्यांतु स्वबलैर्वृताः ॥ ३ ॥ कोटिवीर्याणि पंचाश
दसुराणां कुलानि वै ॥ शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया ॥ ४ ॥ कालका दौर्हृदा मौर्याः काल
केयास्तथासुराः ॥ युद्धाय सज्जा निर्यांतु आज्ञया त्वरिता मम ॥ ५ ॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरवशा
सनः ॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः ॥ ६ ॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभीषणम् ।
ज्यास्वनैः पूरयामास धरणीगगनांतरं ॥ ७ ॥ ततः सिंहो महानादमतीव कृतवान्नृप ॥ घंटास्वनेन
तन्नादानंबिका चोपबृंहयत् ॥ ८ ॥

शाः ४ कालकास्तन्नामानः दौर्हृदाः दुर्हृदोपत्यानि ॥ मौर्यास्तन्नामानः
तथा कालकायाः अपत्यानि ॥ कालकेयाः असुराः सज्जाः ससामग्रीकाः ॥ ५ ॥ इत्येति ॥ भैरवमुग्रं ॥ आ
यांतमिति ॥ आगच्छंतमित्यर्थः ॥ अंतरं मध्यं ॥ ७ ॥ तत इति तन्नादानिति बहुवचनं ॥ महानादमित्येकव
चनविवक्षया ॥ अतीव अत्यंतमनेकवारमित्यर्थो वा ॥ उपबृंहयदित्यत्राडभावः ॥ ८ ॥ ८ ॥

प्र°
उ.टी°
३९

धनुरिति॥ नादैरस्यानैः पूरितदिङ्मुखा काली धनुर्ज्यासिंहघंटानां भीषणैर्नादैर्जिग्ये जिता॥ दैत्याधनुरा
दि शब्दैः काली शब्दैर्जितनष्टनिश्वासैः॥ ९॥ काली चंडी ललाटजा॥ तदिति॥ सरोषैः सक्रोधैः॥ एतस्मिन्निति
देवीदानवसंग्रामावसरे॥ भवाय संपदे॥ ११॥ ब्रह्मेति॥ विसृश शब्दैव मया हन्तुं सिंहाव यि शाक्त यः स्वाव्या निरेकि

धनुर्ज्यासिंहघंटानां नादापूरितदिङ्मुखा॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना॥ ९॥ त
न्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं॥ देवी सिंहस्तथा काली सरोषैः परिवारिताः॥ १०॥ एतस्मिन्नं
तरे भूप विनाशाय सुरद्विषां॥ भवायामरसिंहानामतिवीर्यबलान्विताः॥ ११॥ ब्रह्मेशगुहविष्णू
नां तथेंद्रस्य च शक्तयः॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः॥ १२॥ यस्य देवस्य यद्रूपं यथा भूष
णवाहनम्॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ॥ १३॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः
आयाता ब्रह्मणः शक्तिर्ब्रह्माणी साभिधीयते॥ १४॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी
महाहिवलया प्राप्ता चंद्ररेखाविभूषणा॥ १५ कौमारी शक्तिहस्ता च मयूरवरवाहना॥

णपदेवृताः शक्तिः शक्तिमतोऽस्मादात्मात्॥ १२॥ ब्रह्मादिरूपैरित्यर्थं कैतद्रूपैरिति व्याचष्टे॥ यस्येति॥ तद्वत्॥
तथाविधभूषणवाहनेत्यर्थः॥ १३॥ हंसेति॥ विमानाग्रे रत्यस्यास्थितेति शेषः अक्षसूत्रं जपमाला ब्रह्माणी ब्रा
ह्मणामाय यः॥ निवेशयतीति अन्यत्राय शाद्वः साधुः॥ माहेश्वरीति॥ महाही॥ महत्काननोवलयो यस्याः॥ चंद्रे

ण॥ कुमारसंबंधिनी शक्तिरायययौ विन्यर्थान्नु यौन कत्वं ॥ ऐन्द्रीन्युक्तापि यथा शक्रः शक्रस्तथैव सेति वत् ॥ अं
बिकापदेन गुहस्य शिवत्वं हागनेन सूचयति ॥१६॥ तथैवेति ॥ अत्र शार्ङ्ग पदेन बाणोप्युपलक्ष्यते ॥ वस्तुचिं
हङ्गानूटा शंखचक्रगदासिना ॥ शार्ङ्गबाणधरणा नावैष्णवी रूपधारिणीति ॥ वामनपुराणात्तु ॥ पनेना

योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी ॥१६॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता ॥ शंख
चक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ ॥१७॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः ॥ शक्तिः
साप्याययौ तत्र वाराहीं बिभ्रती तनुम् ॥१८॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥ प्रा
प्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः ॥१९॥ वज्रहस्ता तथैवैन्द्री गजराजोपरि स्थिता ॥
प्राप्ता सहस्रनयना यथा शक्रस्तथैव सा ॥२०॥

प्ताः षड्भुजत्वम ॥१७॥ यज्ञेति ॥ यज्ञांगकल्पितवराहाकारः ॥ बिभ्रतो हरेरित्यनेनास्य विलक्षणमेवेति
सूचितं एवं नृसिंहोपि ॥ नचैवं तत्त्वविष्णुगणेषु शरभवराहनृसिंहेषु विसेषाः शरभपत्न्यानिजं वराहवलहा
रकवेमन्नं नृसिंहस्य च वराहानुपायित्वमुक्तं विरुध्येनेति वाच्यं तस्य लीलामात्रत्वात् ॥१८॥ ॥१९॥ व
ज्रेति ॥ यथा शक्र इन्द्राकारपरं ॥ एवं सर्वास्तु तत्तदाकारत्वा दृष्टव्याः ॥ गजराजे ऐरावते ॥ २०॥

अ॰
दु॰ टी॰
५॰

अतिविशिष्टेनेत्यर्थः ।। कौशिक्याः संविधेयत्वं गतमशक्ताद्देवशक्तिरीशानो देव्यै दर्शितवानित्याह
तत इति ।। ताभिः परिवृत ईशानः सम प्रीत्या प्रपन्नाभिर्देवशक्तिभिर्महासुरा हन्यंतामिति चंडिकामाहेत्य
न्वयः ।। स शंकरः पार्वत्याः प्रादुर्भूतत्वेन पृष्टतया ईशानपदवत्योक्तवानिति भावः ।। अंडाधिकारिण इमे
ब्रह्मादयः । अंडांतराधिकारिणां शुंभादिजितत्वेन दृष्टत्वात्संभवात् ।। स्वस्यापि महामदर्शनेन षष्ठाभ
वतीनस्यान्तमाह ।। किंतु काचिन्नवा शक्तिरित्याह तत इति ।। अतिभीषणा दर्शनमात्राद्भयंकरी ।। अत्युग्रा ते

ततः परिव्रतस्ताभिरीशानो देवशक्तिभिः ।। हन्यंतामसुराः शीघ्रं मम प्रीत्याह चंडिकां ।। २१ ।। ततो
देवीशरीरात्तु विनिष्क्रांतातिभीषणा ।। चंडिकाशक्तिरत्युग्रा शिवाशतनिनादिनी ।। २२ ।। सा
चाह धूम्रजटिलमीशानमपराजिता ।। दूतत्वं गच्छ भगवन्पार्श्वं शुंभनिशुंभयोः ।। २३ ।। ब्रूहि शुं
भं निशुंभं च दानवावतिगर्वितौ ।। ये चान्ये दानवास्तत्र युद्धाय समुपस्थितः ।। २४ ।।

दूतस्वभावा ।। शिवानां शृगालीनां शतेन निनादिनी ।। शतशब्दोऽनंतवाची ।। निनदनेन शिवाह्वाना ।। एषैव
शिवदूती ।। अस्याः हेमंकरी शांता वेदमाता महोदरी कुंभला कामदा भक्ता ।। भगास्या भगमालिनी ।। भ
गोदरी भगा हारा भगजिह्वा भगा ख्याता द्वादश योगिन्य इति कालिकापुराणे २४ ख्यातेति धूम्रवर्णजटावत्वं ।। अ
पराजिता तस्याख्या अपरैरजिता चेह नभावं वास्त्रीवहतं शुंभनिशुंभयोः पार्श्वं च गच्छेत्यन्वयः ।। आहेतिति
पातः कालयेत्तेनमात्रवीदित्यर्थः ।। एतच्छिवापेत्या स्यात्तस्या उभौ च कत्तनपास्त्वा धिक्येन न सहेत्येन नविषण्णा

नातुवितं २३ ब्रूहीति येच तत्र शुंभांतिके ये दानवास्तांश्च ब्रूहीत्य
न्वयः युद्धाय युद्धं कर्तुं २४

वचनमाह ॥ त्रैलोक्यमिति ॥ स्फुटं ॥ २५ ॥ बलेति ॥ अबले योगवं ॥ मक्षिकायामयासहस्तिनदंतः प्रादुर्भूताः पि
शितं मांसम् ॥ २६ ॥ यत इति ॥ तृणमेव दानं ॥ प्रज्ञायता ॥ शिवदूतीमोरा दिवानदीपु अस्यांगत्यं पदा
दिनिवा ॥ २७ ॥ नेयीति ॥ अमेषेण सर्वतः पूरिताः ॥ यतः येदे श्मशानक्रमध्यकात्यायनी स्थितात्तेदेशज्ञ

त्रैलोक्यमिंद्रोलभतां देवाः सेंद्रहविर्भुजः ॥ युद्धं प्रपातालेयदिलीविल्लमिक्षुयः ॥ २५ ॥
बलावलेपादस्थवेद्ववंनोयुद्धकांक्षिणः ॥ नदागक्तुतन्तणतमक्षिकाः पिषिताननवः ॥ २६
यतोनियुक्तो दैत्यानतयादेव्याशिवः स्वयं ॥ शिवदूतीतिलोकेस्मिंस्ततः साख्यातिमागता ॥
तेपिष्कनावयवादेव्याः शिवोख्यानमहासुराः ॥ अमषोपूरितात्तन्मध्यसंतःकात्यायिनी
स्थिता ॥ २८ ॥ ततः प्रथममेवाग्रे शरशक्त्यृष्टिवृष्टिभिः ॥ बबंधुरुद्धनामर्षोत्तां देवीममरा
रयः ॥ २९ ॥ सापि तानाहितान्वाणान् शूलचक्रपरश्वधान् ॥ चिच्छेद लीलयाध्मातधनुर्मु
क्तैर्महेषुभिः ॥ ३० ॥ तस्याग्रतस्तथा काली शूलपातविदारितान् ॥

तस्थुरित्यन्वयः मूलशास्त्रभेदेनास्याप्यपिकात्यायनीनोक्तिः ॥ २८ ॥ तत इति ॥ प्रथममादौ अग्रेस्तस्य
विववृष्टिरिति गुणच्छेदस्मः ॥ उद्धतः प्रकटः ॥ अनेन स्त्रीप्रथमतो हन्तुमयोग्येति विवेकरहित्येन
दैत्याविष्टत्वेस्यचितम ॥ २९ ॥ ३० ॥ तस्येति ॥ तस्याग्रतः इति च्छेदः च्छेदसाः संधिः ॥ तथा चंडी

श्री॰
दु॰टी॰
५८

वत॥ तदा देव्याश सक्रुद्धे एव हुंकारेण व्याख्यातं॥ कालीललाटजा कृष्णवर्णा॥ उग्रशब्दः संभावनायां॥ ३१॥ कमं
डलुनिक्षेपः प्रक्षेपः॥ वीर्यं बलं॥ ओज तेजस्ता॥ धावतीति॥ स्मयोगे भूते लट्॥ ३२॥ माहेश्वरी त्रिस्य
हू॥ ३३॥ ऐंद्रीति॥ दैत्यदानवयोर्नास्ति भेदः॥ ऐंद्रवाः कुलिशपातेन वज्रपातेन॥ ३४॥ तुंडेति॥ वाराही वा
सो मूर्तिः प्रवाराहमूर्तिस्तया च चक्रेणान्येन च वाराह्या सह एव वाराहमुद्रस्थानान्यादितिः संचिते॥ एवं प्र

41

त्वहं गणपोषितं प्रवीरतन् कृष्णवर्णा च वनदा॥ ३१॥ कमंडलुजलाक्षेपहतवीर्यान्हतौजसः॥ ब्र
ह्माणी चाकरोच्छत्रून्येन येन स्म धावति॥ ३२॥ माहेश्वरी त्रिशूलेन तथा चक्रेण वैष्णवी॥ दै
त्याञ्जघान कौमारी तथा शक्त्यातिकोपना॥ ३३॥ ऐंद्री कुलिशपातेन शतशो दैत्यदानवाः
पेतुर्विदारिताः पृथ्व्यां रुधिरौघप्रवर्षिणः॥ ३४॥ तुंडप्रहारविध्वस्ता दंष्ट्राग्रक्षतवक्षसः॥ वा
राहमूर्त्या न्यपतंश्चक्रेण च विदारिताः॥ ३५॥ नखैर्विदारितांश्चान्यान्भक्षयन्ती महासुरान्॥
नारसिंही चचाराजौ नादापूर्णदिगंबरा॥ ३६॥ चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः॥
पेतुः पृथिव्यां पतितांस्तांश्चखादाथ सा तदा॥ ३७॥

त्रिमूर्तेः वराहस्यापि वोध्यं॥ ३५॥ नखैरिति॥ आजौ रणे संग्रामे वा आकाशम्॥ चंडेति॥ चंड उत्कटः सकोपो वा॥ शिवदूत्यभिदूषिता इति तृतीयः समासः॥ अभिदूषिताः प्रापितमूर्छाः॥ सा शिव
दूती॥ ३७॥

चंडाट्टहासैरसुराः शिवदूत्यभिदूषिताः॥ पेतुः पृथिव्यांपतितांस्तांश्चखादाथसातदा॥३८॥
इतिमातृगणंक्रुद्धंमर्द्दयंतंमहासुरान्॥ दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः॥३९॥
पलायनपरांदृष्ट्वादैत्यान्मातृगणार्द्दितां॥ योद्धुमभ्याययौक्रुद्धोरक्तबीजोमहासुरः॥४०॥
रक्तबिंदुर्यदाभूमौपतत्यस्यशरीरतः॥ समुत्पततिमेदिन्यांतत्प्रमाणोमहासुरः॥४१॥
युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः॥ ततश्चैंद्रीस्ववज्रेणरक्तबीजमताडयत्॥४२॥
कुलिशेनाहतस्याशुतस्यसुस्रावशोणितं॥ समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः॥४३॥

52

यावंतः पतितास्तस्य शरीराद्रक्तबिंदवः ॥ तावंतः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥ ५४ ॥
ते चापि युयुधुस्तत्र पुरुषा रक्तसंभवाः ॥ समं मातृभिरत्युग्रशस्त्रपातातिभीषणम् ॥ ५५ ॥
पुनश्च वज्रपातेन क्षतमस्य शिरो यदा ॥ ववाह रक्तं पुरुषास्ततो जाताः सहस्रशः ॥ ५६ ॥
वैष्णवी समरे चैनं चक्रेणाभिजघान ह ॥ गदया ताडयामास ऐंद्री तमसुरेश्वरम् ॥ ५७ ॥
वैष्णवीचक्रभिन्नस्य रुधिरस्रावसंभवैः ॥
सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥ ५८ ॥

स चापीति॥ प्रहनदिति निक्रांदसं॥ रिने रणत्यं दैत्यः॥ महांतो सुराः यस्मादिति महासुरः॥ इतिनिपोनकृत्यम
॥४९॥५०॥ तैश्चेति॥ उत्तमं निरतिशयं॥ सकलं जगद्व्याप्तमिति शेषोक्तिः॥५१॥ तानिति॥ तान्विषण्णान्दृष्ट्वा
त्वरासहिता चंडिका सुरान्प्राह॥ रूपं मा विषीदत इति शेषः॥ एवं सुराणामाश्वास विस्तीर्णं विस्तारवद्

स चापि गदया दैत्याः सर्वा एवाहनत्पृथक्॥ मातृः कोपसमाविष्टो रक्तबीजो महासुरः॥४९
तस्याहतस्य बहुधा शक्तिशूलादिभिर्भुवि॥ पपात यो वै रक्तौघस्तेनासंछतशोसुराः॥५०॥
तैश्चासुरासृक्संभूतैरसुरैः सकलं जगत्॥ व्याप्तमासीत्ततो देवा भयमाजग्मुरुत्तमं॥५१॥ ता
न्विषण्णान्सुरान्दृष्ट्वा चंडिका प्राह सत्वरा॥ उवाच कालीं चामुंडे विस्तीर्णं वदनं कुरु॥५२॥ म
च्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान्॥ रक्तबिंदोः प्रतीच्छ त्वं वक्त्रेणानेन वेगिना॥५३॥

द्वं कुर्विति कालीमुवाचेत्यु पौनरुक्त्यं॥५२॥ मच्छस्त्रेति॥ अनेन विस्तीर्णवदनेन रक्तबिंदोरिति
ज्यान्यापेदत्वया॥ ततो जातान्महासुरान्मच्छस्त्रपातसंभूतान्रक्तबिंदून्भूमिमप्राप्तानेव प्रतीच्छ
गृहाण॥५३॥ किंच पानसमये मदक्रे समुत्पन्नान्महासुरान् भक्षयंती रणे चरणे चर एवं प्रकारे

श्री
दु.टी
५३

ऐोषदैत्याः क्षयं नमिष्यति ॥५४॥ भक्ष्यमाणाः इति ॥ उत्पन्नांस्तं तीति स्त्राधंद्राक्नतड. ॥५५॥ मुखेनेति ॥ शोणि
तम भूगतमेव ॥ विलीनोर्णवाद्धनस्य ॥ अप्तेरक्तवीज ॥५६॥ नचेति विदानोदानस्य कमादिति भावः

भक्षयंती चचरणेतदुत्पन्नान्महासुरान् ॥ एवमेषक्षयंदैत्यः क्षीणरक्तो गमिष्यति ॥५४॥ भ
क्ष्यमाणास्त्वयाचोग्रानचोत्पत्स्यंति चापरे ॥ इत्युक्त्वातांततोदेवीशूलेनाभिजघानतं ॥५५॥ मुखे
नेन्याः भ्या ध्याघांतेरक्तचंदनेन होमः ॥ मुखेनकालीजगृहेरक्तबीजस्यशोणितं ॥ ततोसावाज
घानाथगदयातत्रचंडिकां ५६ ॥ नचास्यावेदनांचक्रेगदापातोल्पिकामपि ॥ तस्याहतस्य
देहात्तुबहुसुस्रावशोणितं ॥५७॥ यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतीछति ॥ मुखेसमु
द्गतायेस्यारक्तपातान्महासुराः ॥५८॥ तांश्चखादाथचामुंडापपौतस्यचशोणितम् ॥ देवी
शूलेनवज्रेणबाणैरसिभिर्ऋष्टिभिः ॥५९॥ जघानरक्तबीजंतंचामुंडापीतशोणितं ॥
सपपातमहीपृष्ठेशस्त्रसंघसमाहतः ॥६०॥

॥५७॥ यतस्ततइति ॥ सर्वतइत्यर्थः ॥ अनिविलीर्णबाहुदनस्यउमुखाद्धमुद्गतानवपि ॥५८॥ तांश्चेति ॥ उ
नणाद्धमुनगानवपि ॥ असिभिरिति क्रियापेक्षंबहुवचनं ॥ ऋष्टिभिरित्यपर्वं ऋष्टिहभयनोधारोसिः
॥५९॥ जघानेति ॥ शस्त्रशौघैः समूहैः समाहतइतिन्नीघः तस्मुहषः ॥६०॥

नीरक्तश्चेति ॥ कल्याणीन निःशेषरुधिरत्वात् ॥ नीरक्तश्चासन् ॥ मही शुष्केप्यपाने न्यत्वयः ॥ ६१ ॥ तेषामिति
तेषाममृगणानां मस्तद् ६ः मदेनोद्धतोज्ञानं तस्मात्सर्गणाः श्रमाणादिसमूहोनननैत्यर्थः ॥ ६२ ॥ इति श्री
शिवभट्टसुतसतीगर्भजनागोजीकृते सप्तशतीव्याख्याने अष्टमोध्यायः ॥ ८ ॥ राजोवाच ॥ विचि

नीरक्तश्च महीपाल रक्तबीजो महासुरः ॥ ननर्तुर्हर्षमतुलमवाप्य त्रिदशा नृप ॥ ६१ ॥ तेषां मा
तृगणो जातो ननर्तासृङ्मदोद्धतः ॥ ६२ ॥ सांगायै शृंखुमात्रासहितायै रक्ताक्ष्यै महाहुतिं समर्प
यामि नमः स्वाहा ॥ श्लो ॥ ६२ ॥ मंत्रा ॥ ६३४ ॥ इति मार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीम
हात्म्ये रक्तबीजवधः ॥ ८ ॥ राजोवाच ॥ विचित्रमिदमाख्यातं भगवन्भवता मम ॥ देव्याश्च
रितमाहात्म्यं रक्तबीजवधाश्रितं ॥ १ ॥ भूयश्चेच्छाम्यहं श्रोतुं रक्तबीजे निपातिते ॥ चका
र शुंभो यत्कर्म निशुंभश्चातिकोपनः ॥ २ ॥ ऋषिरुवाच ॥ चकार कोपमतुलं रक्तबीजे नि
पातिते ॥ शुंभासुरो निशुंभश्च हतेष्वन्येषु चाहवे ॥ ३ हन्यमानं महासैन्यं विलोक्यामर्षमु
द्वहन् ॥ अभ्यधावन्निशुंभोथ मुख्ययासुरसेनया ॥ ४ ॥

विचित्रमिति राज्ञा सुरथाच्चरितं कर्म ॥ माहात्म्यं प्रभा
वः समाहारद्वंद्वः ॥ आश्रितं जनकं ॥ १२ ॥ ऋषिरुवाच ॥ चकारेति ॥ आहवो रणः ॥ ३ ॥ हन्यमानमिति ॥ ४

म॰ दु॰ टी॰ ४४

55

संदष्टौष्ठपुटाः दंताभ्यामंतः संपीडितौष्ठाः ॥ तथासतिपुटाकारतामगंति ॥ ततइति ॥ देव्याइतिसहार्थेतृतीया
७ चिच्छेदेति ॥ ताभ्यामसुराभ्यांक्षिप्तानितान्शरान् ॥ ८ ॥ ९ ॥ ताडितइति ॥ क्षुरप्रः शरविशेषः चर्मफलके

तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुरः ॥ संदष्टौष्ठपुटाःक्रुद्धाहंतुंदेवीमुपाययुः ॥ ५ ॥ आजगा
ममहावीर्यः शुंभोपिस्वबलैर्वृतः ॥ निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः ॥ ६ ॥ ततोयु
द्धमतीवासीद्देव्याःशुंभनिशुंभयोः ॥ शरवर्षमतीवोग्रंमेघयोरिववर्षतोः ॥ ७ ॥ चिच्छेदास्ता
ञ्छरांस्ताभ्यांचंडिकास्वशरोत्करैः ॥ ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ ॥ ८ ॥ निशुंभोनि
शितंखड्गंचर्मचादायसुप्रभं ॥ अताडयन्मूर्ध्निसिंहंदेव्यावाहनमुत्तमं ॥ ९ ॥ ताडितेवाहनेदे
वीक्षुरप्रेणासिमुत्तमं ॥ निशुंभस्याशुचिच्छेदचर्मचाप्यष्टचंद्रकं ॥ १० ॥ छिन्नेचर्मणिखड्गे
चशक्तिंचिक्षेपसोसुरः ॥ तामप्यस्यद्विधाचक्रेचक्रेणाभिमुखागतां ॥ ११ ॥ कोपाध्माता
निशुंभोथशूलंजग्राहदानवः ॥ आयान्तंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत् ॥ १२ ॥

अष्टसंख्याकरत्नादिचरितचंद्राकारसहितं ॥ १० ॥ छिन्नेइति ॥ शक्तिंक्षेपादेवीप्रति ॥ अभिमुखागतां
तांदेवीचिच्छेदेत्यर्थः ॥ ११ ॥ कोपेति ॥ जग्राह ॥ ग्रहणपूर्वकंप्रक्षेपेणगृहीतं ॥ आयान्तंआगच्छन्तंतंशूलं

आविध्य भ्रामयित्वा॥ देव्याः करस्थत्रिशूलेन करणेन सा विगता अपि भस्मत्वमागता नाशमापि माव॥ अंतर्भा
वितण्यर्थोनुक्तः॥१३॥ पुंगवः श्रेष्ठः अत्र निशुंभस्य समर्कासंपादनेन पातनं॥१४॥ तस्मिन्निति॥ प्रययौ॥

आविध्याथ गदां सोपि चिक्षेप चंडिकां प्रति॥ सापि देव्या त्रिशूलेन भिन्ना भस्मत्वमागता॥१३॥ त
तः परशुहस्तं तमायांतं दैत्यपुंगवं॥ आहत्य देवी बाणौघैरपातयत भूतले॥१४॥ तस्मिन्निपति
ते भूमौ निशुंभे भीमविक्रमे॥ भ्रातर्यतीव संक्रुद्धः प्रययौ हंतुमंबिकां॥१५॥ स रथस्थस्तथात्यु
च्चैर्गृहीतपरमायुधैः॥ भुजैरष्टाभिरतुलैर्व्याप्याशेषं बभौ नभः॥१६॥ तमायांतं समालोक्य देवी शं
खमवादयत्॥ ज्याशब्दं चापि धनुषश्चकारातीव दुःसहं॥१७॥ पूरयामास ककुभो निजघंटास्वने
न च॥ समस्तदैत्यसैन्यानां तेजोवधविधायिना॥१८॥ ततः सिंहो महानादैस्त्याजितेभमहाम
दैः॥ पूरयामास गगनं गां तथोपदिशो दश॥१९॥ ततः काली समुत्पत्य गगनं क्ष्मामताडयत्॥

शुंभः निशुंभः॥१५ सः रथि॥ तथा सामुद्रिकोक्तप्रकारेणात्युच्चैर्भुजैर्नभो व्याप्य बभौ भाति स्मेत्यर्थः॥१६॥ आयांतं
आगच्छंतं॥१७॥ स्वनेन चेति॥ चेन शंखस्य ज्याशब्दयोः समुच्चयः॥ वधो नाशः॥ विधायिनेति स्वनविशेषणं
॥१८॥ उपदिशः सामान्यादिग्पदत्योपदिक्षु पूर्वादीनां दशानां॥ तदाह॥ दशेति॥१९॥ समुत्पत्य उत्पत्य

न॰ उ॰ टी॰ ४५ पुनरवनीयं पृथ्वी॥२०॥अट्टट्टहासं शणाकंख्यादिमाव्यरद्रूपं॥अशिवं विघ्नरूपं भयदं॥२१॥आकाशसंस्थितैः॥
देवीदानवसंग्रामदर्शनायनभसि स्थितैः॥२२॥महोल्कयेति महाज्वालावत्याशक्त्यानर्थकं॥यद्वा॥तत्रामश
नैवार्थकं॥२३॥सिंहेति॥उन्नतहस्तनखायोन्यादिः निर्घातनिःस्वनः उत्पातशब्दैः॥जितवानित्यस्य शुंभ

करभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः॥२०॥अट्टाट्टहासमशिवंशिवदूतीचकारह॥तैःश
ब्दैरसुरास्त्रेसुःशुंभःकोपंपरंययौ॥२१॥दुरात्मंस्तिष्ठतिष्ठेतिव्याजहारांबिकायदा॥तदाजयेत्यभि
हितंदेवैराकाशसंस्थितैः॥२२॥शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा॥आयांतीवह्निकू
टाभासानिरस्तामहोल्कया॥२३॥सिंहनादेनशुंभस्यव्याप्तंलोकत्रयांतरं॥निर्घातनिःस्वनोघोरो
जितवानवनीपते॥२४॥शुंभमुक्तान्शरान्देवीशुंभस्तत्प्रहितान्शरान्॥चिच्छेदस्वशरैरुग्रैःशत
शोथसहस्रशः॥२५॥ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतं॥सतदाभिहतोभूमौमूर्छितोनि
पपातह॥२६॥ततोनिशुंभःसंप्राप्यचेतनामात्तकार्मुकः॥आजघानशरैर्देवींकालींकेसरिणंत
था॥२७॥पुनश्चकृत्वाबाहूनामयुतंदनुजेश्वरः॥चक्रायुधेनदितिजश्छादयामासचंडिकां॥२८॥

सिंहनादमभिनिर्घोष॥२४॥शुंभेति॥अनेनदेवीशुंभयोःसममयुद्धमुक्तं॥२५॥ततइतिनिशुंभितःसमंतान॥२६
ततइति॥शुंभमूर्छानंतरंनिशुंभोपिपूर्वंमूर्छितः॥आत्तेतिगृहीतं॥२७॥पुनरिति॥दनोःपुत्रोपिदितिजस्तमा

नवनीताटीकायां २८

ततइति ॥ दुर्गे संकटे ॥ आर्त्तेः पीडाया नाशिनी निराणि निमल्यर्थः ॥२९॥ ततइति ॥ दैत्यसेनयासमावृतः
॥३०॥३१॥ शूलेति ॥ समायांतं सन्मुखमायांतं ॥ वेगाविद्धेन ॥ वेगक्षिप्तेन ॥३२॥३३॥ स्वनवदिति ॥ प्रह

ततोभगवतीक्रुद्धादुर्गादुर्गार्तिनाशिनी ॥ चिच्छेदतानिचक्राणिस्वशरैःसायकांश्चतान् ॥२९॥ त
तोनिशुंभोवेगेनगदामादायचंडिकां ॥ अभ्यधावतवैहंतुंदैत्यसेनासमावृतः ॥३०॥ तस्यापत
तएवाशुगदांचिच्छेदचंडिका ॥ खड्गेनशितधारेणसचशूलंसमाददे ॥३१॥ शूलहस्तंसमा
यांतंनिशुंभममरार्दनं ॥ हृदिविव्याधशूलेनवेगाविद्धेनचंडिका ॥३२॥ भिन्नस्यतस्यशूले
नहृदयान्निःसृतोपरः ॥ महाबलोमहावीर्यस्तिष्ठेतिपुरुषोवदन् ॥३३॥ तस्यनिष्क्रामतोदे
वीप्रहस्यस्वनवत्ततः ॥ शिरश्चिच्छेदखड्गेनततोसावपतद्भुवि ॥३४॥ ततःसिंहश्चखादोग्र
दंष्ट्राक्षुण्णशिरोधरान् ॥ असुरांस्तांस्तथाकालीशिवदूतीतथापरान् ॥३५॥ कौमारीशक्ति
निर्भिन्नाःकेचिन्नेशुर्महासुराः ॥ ब्रह्माणीमंत्रपूतेनतोयेनान्येनिराकृताः ॥३६॥ माहेश्व
रीत्रिशूलेनभिन्नाःपेतुस्तथापरे ॥ वाराहीतुंडघातेनकेचिच्चूर्णीकृताभुवि ॥३७॥

सैन्यस्य विशेषणं ॥३५॥ ततइति ॥ उग्रमिति क्रियाविशेषणं कालीशिवदूतीच चखादेत्यन्वयः

३५ निराकृताध्वस्ताः । मंत्रोत्रप्रणवः । ३६ ॥ ३७ ॥

दु. टी. ४६

खड्गैः खड्गैः खड्गैः प्रकारान्तः ॥ खड्गस्य खड्गशब्दो यस्यां क्रियायां ॥ तया हता ॥ अग्रे प्रकारेण गणवचनस्येति द्वित्वं
वज्रेण च खड्गखड्गहतानामन्यैव ॥ २८ ॥ विनेशुर्मेनाः नष्टाः पलायिताः ॥ २९ ॥ इति श्रीसप्तशतीव्याख्याने
नवमोऽध्यायः ॥ ९ ॥ ऋषिरुवाच ॥ निशुम्भमिति ॥ अब्रवीदित्यस्य देवीमिति शेषः ॥ १ ॥ बलेति ॥ बल

खड्गैः खड्गैश्च चक्रेण वैस्वव्यात्रानवाः हताः ॥ वज्रेण चैन्द्री हस्ताग्रविमुक्तेन तेन पापरे ॥ २८ ॥ केचि
द्विनेशुरसुराः केचिन्नष्टा महाहवात् ॥ भक्षिताश्चापरे काली शिवदूती मृगाधिपैः ॥ २९ ॥ इति श्रीमा
र्कण्डेयपुराणे सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये निशुम्भवधः ॥ ९ ॥ ऋषिरुवाच ॥ निशुम्भं नि
हितं दृष्ट्वा भ्रातरं प्राणसंमितं ॥ हन्यमानं बलं चैव शुम्भः क्रुद्धोऽब्रवीद्वचः ॥ १ ॥ बलावलेपाद्दुष्टे त्वं
मा दुर्गे गर्वमावह ॥ अन्यासां बलमाश्रित्य युद्ध्यसे यातिमानिनि ॥ २ ॥ सेनापये भैरव्येनारायेम
लाहूतिसमयास्मिन मः स्वाहा ॥ श्लो ॥ २९ ॥ मे मा ॥ ध ॥ देव्युवाच ॥ एकैवाहं जगत्यत्र द्वितीया
का ममापरा ॥ पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः ॥ ३ ॥ ततः समस्तास्ता देव्यो ब्रह्माणी
प्रमुखा लयम् ॥

गर्वोत्तरादुर्विनीतेन दुर्गे गर्वमाह ॥ यत्त्वमातिमानिनीसती ॥ अन्यासां बलमाश्रित्य युद्ध्यसे इत्यन्वयः ॥ २
देव्युवाच ॥ एकैवेति ॥ एकाऽसगते भेदहीना ॥ परमात्मरूपत्वात् ॥ अपरान्यामम सहाय ॥ भूता द्वि
तीया कास्ति न कापीत्यर्थः ॥ अनुभूयमानस्य भेदोऽनवान्तवइत्याह ॥ पश्यैता निखानार्थ्यस्या कमन्तं मद्विभूत

46

अनेन ब्रह्मादिभ्य आविर्भूतानामप्यत्र पदलयदर्शनेन समस्तोपास्यानां ममस्वरूपत्वे निदर्शयति ॥ तत्र मूलश्लो
कं भेदादित्युक्तं ॥ ४ ॥ देव्युवाच ॥ अहमिति ॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थिता ॥ तत्संहृतं मयास
हृतं तस्मादहमेकैव तिष्ठामि न ममपि रणेऽस्थिरो भवेत्यर्थः ॥ अनेनापि तदेव दृढीकृतं ॥ ५ ॥ ऋषिरुवाच ॥ ततः

तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदाम्बिका ॥ ४ ॥ देव्युवाच ॥ अहं विभूत्या बहुभिरिह रूपैर्यदास्थि
ता ॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव ॥ ५ ॥ ऋषिरुवाच ॥ ततः प्रववृते युद्धं देव्याः शुम्भस्य चो
भयोः ॥ पश्यतां सर्वदेवानामसुराणां च दारुणं ॥ ६ ॥ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः ॥
तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं ॥ ७ ॥ दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका ॥ बभंज
तानि दैत्येन्द्रस्तत्प्रतीघातकर्तृभिः ॥ ८ ॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी ॥ बभंज लील
यैवोग्रहुंकारोच्चारणादिभिः ॥ ९ ॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः ॥ सापि तत्कुपिता देवी
धनुश्चिच्छेद चेषुभिः ॥ १० ॥ छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे ॥ चिच्छेद देवी चक्रेण तामप्यस्य

ति । पश्यतामित्यनादरे षष्ठी ॥ ६ ॥ भूयः म
हत् ॥ ७ ॥ ८ ॥ उग्रं च तत् हुंकारोच्चारणं च तदादिभिः तैः येषामस्त्राणां तैः ॥ तत्र सा तत्कुपिता ॥ धनुः इषुभिः
सह ॥ १० ॥ छिन्ने इति ॥ तथा तेन प्रकारेण छिन्ने धनुषीत्यन्वयः ॥ ११ ॥

टे.
उ.टी.
४

ननश्वति॥ शाक्निकेद्रानेनरमित्यर्थः॥ भानुमदितिनिकिरणयुक्तमित्यर्थं॥ एवंद्रस्य शानचंद्रस्यचमेगास्त्र
विशेषणं॥ नदापुष्ठमकालेनदैत्यानामधिपेश्वरः ननिगमकनास्समास॥ १२॥ चर्मेति॥ वितनास्वसारोख्याः
समुच्चयः॥ १३॥ नदाह॥ हनाम्बश्वति॥ १४॥ समुष्टिमितिदेत्याहृदयेश्वनयः॥ नलेप्रस्तनाशुलिकचपेटः

47

ततः खड्गमुपादाय शानचंद्रं चमानुमत॥ अभ्यधावत्तदादेवी दैत्यानामधिपेश्वरः॥ १२॥ तस्यापत
तएवाशुखड्गं चिच्छेदचंडिका॥ धनुर्मुक्तैः शितैः बाणैश्चर्म चार्ककरामलं॥ १३॥ हनाश्वः सतदा
दैत्यश्छिन्नधन्वा विसारथिः॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः॥ १४॥ चिच्छेदापततस्तस्य
मुद्गरं निशितैः शरैः॥ तथापि सोभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥ १५॥ समुष्टिं पातयामा
सहृदये दैत्यपुंगवः॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥ १६॥ तलप्रहाराभिहतो निपपात
महीतले॥ सदैत्यराजः सहसा पुनरेव तथोत्थितः॥ १७॥ उत्पत्य च प्रगृह्योच्चैर्देवींगगनमास्थितः
तत्रापि सा निराधारा युयुधे तेन चंडिका॥ १८॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परम्॥ चक्रतुः प्रथमं
सिद्धमुनिविस्मयकारकं॥ १९

॥ १५॥ १६॥ सहसा तर्कितं॥ १७॥ उत्पत्येति॥ भूमेः सकाशाद्दूर्ध्वं गत्वा॥ उच्चैर्गमनमित्यन्वयः आस्थितः॥ आस्थि
तवान्॥ निराधाराऽसम्भाव्यत्वेन पातनाभाव हेतुहाना तेन शुभेन॥ १८॥ नियुद्धं बाहुयुद्धं तद्विशेषणं प्रथम
मिति तत्पूर्वकं॥ सिद्धादेव योनिविशेषः मुनयः॥ ऋषयः॥ १९॥ रामायनमः शंकरायनमः

५

उत्पात्य कंकं दुकवद्रु परिह्निमापतनसमयेत्रुरणमहत्पथ्रामया मासधरणीतले विद्धेपत्यर्थः ॥२०॥ देवि गिरं
वेगवान् ॥२१॥ ॥२२॥ विततनः कृतनव्रणः चालयन्निनिदत्साधावश्राद्धेः ॥२३॥ प्रसन्नमकाशवन्त्सास्थ्यंश्रना
विलनं ॥२४॥ उत्पातेनति उत्पातमस्तचकामेघाः ॥ इत्पाताश्च भाश्च भेदेवश्च भेच ॥ उल्कादिच्चतेजः साकश्च भे
वधान ॥ तथानद्यस्सरितोमार्गवाहिन्यः ॥ नहुर्वबुद्धम्यथणामिवाः श्रासन ॥ तत्रश्च भे ॥२५॥ ॥२६॥ पुण्याश्च

ततो नियुद्धं सुचिरं कृत्वा तेनांविका सह ॥ उत्पात्य भ्रामयामास चिक्षेप धरणीतले ॥२०॥ स क्षिप्तो
धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः ॥ अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया ॥२१॥ तमायान्तं
ततो देवी सर्वदैत्यजनेश्वरं ॥ जगत्यां पातयामास भित्त्वा शूलेन वक्षसि ॥२२॥ स गतासुः पपा
तोर्व्यां देवीशूलाग्रविक्षतः ॥ चालयन्सकलां पृथ्वीं साब्धिद्वीपां सपर्वतां ॥२३॥ ततः प्रसन्नमखि
लं हते तस्मिन्दुरात्मनि ॥ जगत्स्वास्थ्यमतीवाप निर्मलं चाभवन्नभः ॥२४॥ उत्पातमेघाः सोल्का
ये प्रागासंस्ते शमं ययुः ॥ सरितो मार्गवाहिन्यस्तथासंस्तत्र पातिते ॥२५॥ ततो देवगणाः सर्वे
हर्षनिर्भरमानसः ॥ बभूवुर्निहते तस्मिन्गन्धर्वा ललितं जगुः ॥२६॥ अवादयंस्तथैवान्ये ननृतुश्चा
प्सरोगणाः ॥ ववुः पुण्यास्तथा वाताः सुप्रभोऽभूद्दिवाकरः ॥ जज्वलुश्चाग्नयः शान्ताः शान्ता दिग्जनित

तुहलाः ॥२६॥ जज्वलुरिति ॥ अग्नयश्चाहवनीयादयः शान्ताः ॥ सौम्याः सन्तो जज्वलुः शान्ता दिग्जनिताः
स्वनाः ॥ उत्पातसूचकाः स्फुटनामादिशब्दा येषां ते ॥२७॥ अस्यानूर्ध्वयामले ॥ सरस्वत्यष्टहस्तान्तवाणा
वमुसलतथा ॥ शूलेचक्रमहा ॥ तथाशांखेनचंद्रांवेलांगलंतथा ॥ धनुरतोनिदिव्यानिहस्तेदेवीदि भर

९२ हि

प. टी.
४८

निःसा॥ अन्नपर्वतसंकाशामन्नपूर्णां विभूषिताम्॥ नानारत्नसमाकीर्णां वेदविद्याविनोदिनीम्॥ अग्निनेत्रा
नेत्रं पञ्चास्यं शुभनिवर्हिणीमिति॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृते सप्तशतीव्याख्याने द
शमोऽध्यायः॥१०॥ ऋषिरुवाच॥ देव्यानि तत्र युद्धे वह्निपुरोगमास्ताव हि मुख्याः॥ कात्यायनीमित्यनेन परामपरा
मास्तामेकां स्तुवन्ति॥ इष्टलाभादिवरप्राप्तलाभात्मा मनो विकासीति विकसितानि वक्त्राण्यस्य ॥ ॥ ॥

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे श्रीदेवीमाहात्म्ये शुम्भवधः॥१०॥ श्लो॥२०॥ मंत्राः॥३२॥
मागायै सिंहासनायै शूलपाशधारिण्यै महाहुतिं समर्पयामि नमः स्वाहा॥ ऋषिरुवाच॥ देव्याहते
तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्निपुरोगमास्ताम्॥ कात्यायनीं तुष्टुवुरिष्टलाभाद्विकाशिवक्त्रा
ब्जविकासिताशाः॥१॥ देवि प्रपन्नार्तिहरे प्रसीद प्रसीद मातर्जगतोऽखिलस्य॥ प्रसीद विश्वे
श्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य॥२॥ आधारभूता जगतस्त्वमेका महीस्वरूपेण यतः
स्थितासि॥ अपां स्वरूपस्थितया त्वयैतदाप्यायते कृत्स्नमलङ्घ्यवीर्ये॥३॥ त्वं वैष्णवी शक्तिरन
न्तवीर्या विश्वस्य बीजं परमासि माया॥ संमोहितं देवि समस्तमेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः॥
विद्याः समस्तास्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु॥ त्वयैकया पूरितमम्बयैतत्का ते स्तु

नेत्रपादक्षरणे॥ विकाशिना प्रकाशिना आशा यैः॥१॥ देवीति प्रपन्ना भक्ताः आर्ताश्च॥ इतरत्सर्वं स्पष्टमिति
भावः॥२॥ आधारभूतेति॥ तत्र हेतुर्महीरूपेण स्थितिः॥ अपां स्वरूपस्थितया॥ अब्भिन्नस्वरूपेण स्थितया
गमकत्वात्समासः॥ आप्यायते प्रीणयति॥ कर्मणि लट् यको॥ अनेनोपलक्षणेन सर्वाण्यन्यानि विशिनं
नमिति॥ आद्यपादे पालनशक्तिमत्त्वं॥ द्वितीये कारणशक्तिमत्त्वं॥ मायाविद्या॥ तयैव तत्संमोहितं संसारगर्ते पातितं॥ तत्किं मोक्षो नास्त्येवेत्य

पेताः॥ यानि ब्रह्मसौंदर्यवत्ताद्यन्यायुपेताः समस्ताः स्त्रियोपि तव भेदाः स्त्रियः स्तुफलदित्वमित्याह॥ त्वये
कयैतन्त्पूरितमेतद्व्याप्तं॥ एवं च तव॥ इत्थम्भूतस्याभावात्॥ स्तव्यस्तुत्योर्विषयेण परा
गाणीमुख्याच योक्तिः स्तद्रूपा सन्ति॥ का ते स्तुत्यर्थः॥ यद्वा॥ उक्तिरूपा न भवन्ति: कापि स्तुतिरिति॥५॥ पुन
रपि स्तुते स्तुत्वमाह॥ सर्वेति॥ सर्वभूता विश्वात्मिका देवी ध्यानशीला॥ स्वर्गमुक्तेश्चक्रधारा
दात्रीति॥ यदा त्वं स्तुता तदा तव स्तुतये परमाः श्रेष्ठा उक्तयः का वा भवन्तु॥ न काप्यपीत्यर्थः॥ न
याभ्युपगम्याप्याह॥ सर्वस्येति॥ बुद्धिर्निश्चयात्मकं ज्ञानं॥ तद्रूपे च स्वर्गापवर्गदत्वे॥ नारायण

सर्वभूता यदा देवी स्वर्गमुक्तिप्रदायिनी॥ त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः॥६॥ सर्वस्य
बुद्धिरूपेण जनस्य हृदि संस्थिते॥ स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते॥७॥ कलाकाष्ठा
दिरूपेण परिणामप्रदायिनि॥ विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते॥८॥

णस्य विष्णोः॥ शक्तिर्नारायणी॥ यद्वा नाराणां जीवसमूहस्यायनी स्थानभूता तद्रूपा तत्संबोधनं॥ ते
तुभ्यं॥७॥ कलेति॥ कला त्रिंशत्काष्ठा॥ अष्टादश निमेषाः काष्ठा॥ आदिना तत्परिणामरूपं संवत्सरः॥ प
रिणामो जन्मवृद्ध्यवस्थाविशेषः॥ तेन कालरूपात्॥ तदेव पुनराह॥ विश्वस्योपरतौ नाशे
शक्तिमतीत्यर्थः॥ कालस्यैव जगद्ध्वंसकत्वात्॥ सर्वमंगलेति॥ मंगलानां मंगलतद्रूपे शिवे कल्याण

दु॰से
५५

कचिद्‌शरणेपशरण्ये॥ त्र्यंबके त्रिनेत्रे गौरि॥ गौरवर्णे॥ अनेन श्लोकेन नमस्यावक्षलितं॥ नउक्तं देवीपुराणे॥ सर्वा
णि हृदयस्थानि॥ मंगलानि शुभानि च॥ ददाति चेप्सितांल्लोके तेन सा सर्वमंगला॥ भक्तानां मानि हराणि
मंगल्यानेन सा स्मृता॥ शिवं मुक्तिः समाख्याता तानन्यददाति वा स्मृतं॥ धर्मादीन्सिद्धीन्नितान्या सा
सर्वलोकस्य यच्छति॥ अतो देवी समाख्याता लोके सर्वार्थसाधिका॥ विषये भयघोरेषु शरण्यापासमर
णायतः॥ शरण्या तेन सा देवी मुनिभिः परिकीर्तिता॥ सोमसूर्यानलाह्वयं नेत्रत्र्यंबका सा स्मृता बुधैः
योगाग्निदग्धदेहाया पुनर्जाता हिमालये॥ शंखकुंदधवलाननेन गौरी तु सा स्मृता॥ ज्ञलायनानग

49

सर्वमंगलमंगल्ये शिवे सर्वार्थसाधिके॥ शरण्ये त्र्यंबके गौरि नारायणि नमोस्तु ते॥ ९॥ सृष्टिस्थि
तिविनाशानां शक्तिभूते सनातने॥ गुणाश्रये गुणमये नारायणि नमोस्तु ते॥ १०॥ शरणागत
दीनार्तपरित्राणपरायणे॥ सर्वस्यार्तिहरे देवि नारायणि नमोस्तु ते॥ ११॥

२

धारासमुद्रशायना पिता॥ नारायणी समाख्याता॥ नरनारीसमन्विता॥ ९॥ वसत्यः स्थासर्वेषु भूतेषु वन
हिताय तः॥ दयाव्याप्तमिदं सर्वे जगत्स्थावरजंगमम् इति॥ अस्य श्लोकस्य संपाठनिपाठो महाफल
इति कालिकापुराणे॥ ९॥ सृष्टीति॥ आचार्यैन ब्रह्मादीनां सृष्ट्यादिशक्तिरूपमेवेत्युक्तं॥ सनातने
नित्ये गुणानां महदादीनाम् आश्रयभूते॥ गुणमये॥ क्रियमाणगुणकृतविकारे॥ १०॥ शरणेति॥
दीनाः सर्वरहिताः दुःखभाजः॥ आर्ताः नरकादिपीडिताः परायणे तत्परे॥ नउपपातकमानि हरे इति

हंसेति॥ हंसयुक्तविमानस्थिते॥ ब्रह्माणीरूपधारिके कुशांजलं॥ तस्याः पंके कोशं॥ कमंडलुः॥ तदंभसः क्षरिके सविके॥१२॥ त्रिशूलेति॥ माहीश्वरीस्वरूपेणेति पूर्वोक्तेनान्वयि॥१३॥ मयूरेति मयूरकुक्कुटैर्वृते निष्के॥ ऽनघे॥ कुक्कुटः कङ्कमेपि केकुपुत्रे चरणायुधश्चेति मेदिनी॥ मयूरपिञ्छध्वजवतीत्यर्थः॥ ४॥

हंसयुक्तविमानस्थे ब्रह्माणीरूपधारिणि॥ कौशांभःक्षरिके देवि नारायणि नमोस्तु ते॥१२॥
त्रिशूलचंद्राहिधरे महावृषभवाहिनि॥ माहीश्वरीस्वरूपेण नारायणि नमोस्तु ते॥१३॥ मयूरकुक्कुटवृते महाशक्तिधरेनघे॥ कौमारीरूपसंस्थाने नारायणि नमोस्तु ते॥१४॥ शंखचक्रगदाशार्ङ्गगृहीतपरमायुधे॥ प्रसीद वैष्णवीरूपे नारायणि नमोस्तु ते॥१५॥ गृहीतोग्रमहाचक्रे दंष्ट्रोद्धृतवसुंधरे॥ वराहरूपिणि शिवे नारायणि नमोस्तु ते॥१६॥ नृसिंहरूपेणोग्रेण हंतुं दैत्यान्कृतोद्यमे॥ त्रैलोक्यत्राणसहिते नारायणि नमोस्तु ते॥१७॥ किरीटिनि महावज्रे सहस्रनयनोज्ज्वले॥ वृत्रप्राणहरे चैंद्री नारायणि नमोस्तु ते॥१८॥ शिवदूतीस्वरूपेण हतदैत्यमहाबले॥ घोररूपे महारावे नारायणि नमोस्तु ते॥१९॥

नेन शिविक्षिहां एणा मुक्त्वा तेन समाहृतेति हरिवेधाक्तः स्तनवेष्वयवहिते॥ कुमारशाक्तेरिवं रूपसंस्थानमवयवसन्निवेशाश्रयस्याः॥१४॥ शंखेति॥ शंखादीनि रतानि परमायुधानि यस्याः॥१५॥ नृसिंहेति त्रैलोक्यत्राणाय सम्यक् हितेन लोपः॥१७॥ महावज्र इति महद्वज्रं यस्याः॥१८॥ शिवेति

दुर्गासप्तशतीटीका ॥ ८५ ॥

प॰ हेलक्ष्मि॥महाविद्याउपनिषत् श्रद्धा आस्तिक्यबुद्धिः पुष्टिसिद्धिस्वधे॥महती अविद्या आत्मावरणसमर्था महा॰
दु.टी॰ मोहस्वरूपे॥२१॥मेधेइति॥मेधाधारणावती वाग्देवता वरे श्रेष्ठे भूतिः ममत्वं तन्मथने क्षोद सेतुगुणभावः
५॰ श्रेनेन सो नियते॥बभ्रुरक्तो गुण तत्युक्ते॥तामसि॥तमोगुणयुक्ते॥इदं मूलशास्त्रभेदाभिप्रायेण निय

50

दंष्ट्राकरालवदने शिरोमालाविभूषणे चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते॥२०॥लक्ष्मि लज्जे
महाविद्ये श्रद्धे पुष्टिस्वधे ध्रुवे महारात्रि महाविद्ये नारायणि नमोऽस्तु ते॥२१॥मेधे सरस्वति वरे भूते
बाभ्रवि तामसि नियते त्वं प्रसीदेशे नारायणि नमोऽस्तु ते॥२२॥सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते॥२३॥एतत्ते वदनं सौम्यं लोचनत्रयभूषितं॥पातु नः सर्वभू
तेभ्यः कात्यायनि नमोऽस्तु ते॥२४॥ज्वालाकरालमत्युग्रमशेषासुरसूदनं॥त्रिशूलं पातु नो भीते
भद्रकालि नमोऽस्तु ते॥२५॥हिनस्ति दैत्यतेजांसि स्वनेनापूर्य या जगत् सा घण्टा पातु नो देवि पा
पेभ्यो नः सुतानिव॥२६॥असुरासृग्वसापङ्कचर्चितस्ते करोज्ज्वलः॥शुभाय खड्गो भवतु चण्डिके.

२५

नियते त्वं नकूपे ईशे समर्थे॥२२॥सर्वेति॥देवी नयस्य हि कृत्स्निः॥प्रसादने माहीन्यार्थः॥२३॥सर्वभूतेभ्यः॥सर्व
भूतविकारेभ्यः प्राणिभ्यश्च॥कात्यायनि तदाश्रय संभवे॥२४॥ज्वालेति॥नो स्मान् भीते भयात्॥२५॥
हिनस्तीति॥स्वनः प्राणीमात्रानां वासनानि वनो रम्मान्यापेभ्यः पातिन्यर्थः॥आज्ञिते पचायच्च॥२६॥असृ
सुरेति॥चर्चितो लिप्तः करे हस्ते॥उज्ज्वलयति ज्वरैः किरणै रुज्ज्वलो वा॥२०॥ २ २ २

रोगा निति ॥ अभीन सियान ॥ अपरं सीत्यनुक्रमाने ॥ विपन्नः इह विधीयोगलक्षणं ॥ यतः सर्व्वमाश्रिता । अन्येषामा
श्रयता ॥ प्रयांति ॥ २८ ॥ एतत्तिति ॥ कद्रूतनागाः धर्मद्विषो महाः अप्रत्यक्षधुना ॥ आत्ममूर्तिमेव अनेकरूपैः
ब्रह्माण्मादिकल्पादिलक्षणैः ॥ अभेदेन नीया ॥ यद्यथा बहुप्रकारेणाव्याना दिनवाकानकापीत्यर्थः ॥ २९
विद्यास्विति विद्यासूत्रानेषु ॥ उपायभूतानि यानि शास्त्रादीनि तेषु मनाषु केषु विवेकदीयेषु उपनिषत्सु

रोगानशेषानपरं स्मिन्नष्टान्कष्टानकामानमकुलानभीष्टान् ॥ त्वामाश्रितानां न विपन्नराणां त्वामाश्रि
ताश्रयतां प्रयांति ॥ २८ ॥ एतत्कृतं यत्कदनं त्वया यधर्मद्विषां देवि महासुराणां ॥ रूपैरनेकैर्बहु
धात्ममूर्तिं कृत्वांबिके तत्प्रकरोति कान्या ॥ २९ ॥ विद्यासु शास्त्रेषु विवेकदीपेष्वाद्येषु वाक्येषु च
का त्वदन्या ॥ ममत्वगर्तेतिमहांधकारे विभ्रामयत्येतदतीव विश्वं ॥ ३० ॥ रक्षांसि यत्रोग्रविषाश्च
नागा यत्रारयो दस्युबलानि यत्र ॥ दावानलो यत्र तथाब्धिमध्ये तत्र स्थिता त्वं परिपासि विश्वं ३१
विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वं ॥ विश्वेशवंद्या भवती भवंति विश्वा

श्रयेषु वाक्येषु कर्मकांडउपरवेदवाक्येषु सत्स्वेव ॥ ममत्वगर्ते तदाश्रये महांधकारे संसारे एतद्विश्वं त्वदन्या
का अतीव विभ्रामयति न कापीत्यर्थः ॥ ३० ॥ रक्षांसीति ॥ नागाः ॥ सर्पाः ॥ अरयः शत्रवः त्यनुष्ठानते दस्यवः चौराः
दावो वनं तथाब्धिमध्ये ॥ यत्र अप्यर्थमादयः ॥ न तत्र मेव व्यापकत्वात् स्थिता विश्वं परिपासीत्यर्थः ॥ ३१
यतस्त्वं विश्वेश्वरी अतो विश्वं परिपासि यतस्त्वं विश्वात्मिका अतस्त्वं तद्धारयसि ॥ यतो भवती विश्वेशानामपि ब्रह्मादीनामपि स्तु
त्याः न त्वयि भक्तिनम्रा ये ते विश्वाश्रया भवंति ॥ ३२ ॥

प. दु. टी. ५२

51

देवीति॥ हे देवि नोस्मान्स्मद्यः लगणमात्रेण शत्रुभीतेः पालय यथासुरवधेनैव सद्यस्त्वया सर्वथात्मनः पालितवत्य
सि तथेत्यर्थः॥ सर्वजगतां पापानि प्रशमं शीघ्रं शमनं नय च उत्पातानां पाकः फलं तेन कालसूचनेन जनिता
न्महोपसर्गान्मार्यादीन्प्रशमं नय॥३३॥ प्रणतानामिति ईड्ये स्तुत्ये॥३४॥ देव्युवाच॥ वरदेति यं वरं य
मभीप्सितार्थं तु एतं वृणुध्वं प्रार्थयध्वम्॥३५॥ देवा ऊचुः॥ सर्वबाधेति॥ सर्वा चासौ बाधा चेत्यर्थः॥३६ वैरिविना
शनस्यैव विशेषणं॥ एवमेव॥ शुम्भादिनाशनवदेव॥३६॥ देव्युवाच॥ वैवस्वतेति॥ अन्तरे मन्वन्तरे॥ अष्टाविंश

देवि प्रसीद परिपालय नोरिभीतेर्नित्यं यथासुरवधादधुनैव सद्यः॥ पापानि सर्वजगतां प्रशमं न
याशु उत्पातपाकजनितांश्च महोपसर्गान्॥३३॥ प्रणतानां प्रसीद त्वं देवि विश्वार्तिहारिणि॥ त्रै
लोक्यवासिनामीड्ये लोकानां वरदा भव॥३४॥ देव्युवाच॥ वरदाहं सुरगणा वरं यन्मनसेच्छथ
तं वृणुध्वं प्रयच्छामि जगतामुपकारकं॥३५॥ देवा ऊचुः॥ सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्व
रि॥ एवमेव त्वया कार्यमस्मद्वैरिविनाशनं॥३६॥ देव्युवाच॥ वैवस्वतेन्तरे प्राप्ते अष्टाविंशतिमे युगे॥
शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥३७॥ नंदगोपगृहे जाता यशोदागर्भसंभवा॥ ततस्तौ

तितमष्टाविंशतिसंख्याके॥ रोमहर्षणमते कृतादयः युगेषु चतुर्युगेषु तत्र कलिद्वापरसंधावनयोरुत्पत्तिः॥३७॥ नं
देति॥ नंदगोपस्य गृहे एषा महालक्ष्म्यंशभूता॥ नंदा भगवती नाम या भविष्यति नंदजा॥ कनकोत्तमकान्तिः
सा सुकान्तिकनकाम्बरा॥ कमलाङ्कुशपाशाब्जैरलङ्कृतचतुर्भुजा॥ इन्दिरा कमला लक्ष्मीः सा श्री रुक्माम्बु
जासनेति॥ रहस्योक्तेः॥ श्रायणाः॥ शौरिरेनवरान्न प्रादुर्भावः॥३८॥

पुनरपीति ॥ स्वयमपि ह्यापरे मीनेन नैवेव चतुर्युगेष्ववनीतोऽन्यान्नहृः दैवेस्वविनाव ॥ विस्मयविस्नेवयपान ॥ ३९ ॥ ४० ॥ नतनर
लि ॥ एवावरक्तदंतिकाकाल्यंशभूता ॥ अंगदनेत्नुपलक्षणेन केशाग्रुपसावीवययवेषु रक्तत्वमस्याः अतएवा
स्यारक्तचामुण्डात्वेन व्यवहारः तथाक्रुत्सनवर्णाभावे रक्तांबरविभूषणेन ॥ रक्ताग्रुधारक्तनेत्रारक्तकेशविनम्र
धेज्ञा ॥ रक्तदंतीरक्तनखोरक्तदंष्ट्राविभीषणा ॥ वसुदेवविशालाक्षामेरुयुगलस्तनी ॥ स्तनोल्लेवावनि

पुनरप्यतिरौद्रेण रूपेण पृथिवीतले ॥ अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ३९ ॥
भक्षयन्त्याश्च तानुग्रान्वैप्रचित्तान्महासुरान् ॥ रक्ता दन्ता भविष्यन्ति दाडिमीकुसुमोपमाः ॥ ४० ॥
ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ॥ स्तुवन्तो व्याहरिष्यन्ति सततं रक्तदन्तिकाम् ॥ ४१ ॥
भूयश्च शतवार्षिक्यामनावृष्ट्यामनम्भसि ॥ मुनिभिः संस्तुता भूमौ संभविष्याम्ययोनिजा
ततः शतेन नेत्राणां निरीक्षिष्यामि यन्मुनीन् ॥ कीर्तयिष्यन्ति मनुजाः शताक्षीमिति मां
ततः ॥ ४३ ॥ ततोऽहमखिलं लोकमात्मदेहसमुद्भवैः ॥

स्यलोककथावतिमात्रकौ ॥ स्वभक्तान्पालयेदेषा भ
क्तिमालिंग्यति छत्रिखड्गं च पात्रं च मुशलं लांगलं करैः ॥ बिभ्रतीतियामलोक्तेः अत्र सर्वत्राहमिति निर्देशः
परस्वरमपि शक्तीनामभेदाभिप्रायेण ॥ ४१ ॥ भूयश्चेति ॥ अनंभसि कूपादिजलशून्यायामपीत्यर्थः ॥ अयो
निजा यथेदानीं पार्वती देहाद्याविर्भावप्रवमेवेत्यर्थः ॥ ४२ ॥ यद्यस्मान्मुनीन्निरीक्षिष्यामि ततस्तस्मात् ॥
॥ ४३ ॥ देवस्तनमवनं नरेणव चत्वारिंशत्तमेयुगे शताक्षीशाकंभयवनारः ॥ नस्मिन्नवाने देशाकचना विशन

मेघुगेः स्तिलक्ष्मीनं चोक्ते ॥ तत्रैव दुर्गनामासुरं वधः शाकंभरीस्तवनध्याय शाकंभरीजयपद्ममन ॥ अथध्यानमस्याः
नेभूनिमत्र पानोद्भवारनि ॥ श्मिलि चतत्रैव हूलस्तवणां महालीवानीलोत्पलविलोचना ॥ गंभीरणाभिस्त्रि
वलीतनुमध्यामनोहरा ॥ सुकर्कशा चंद्रभासाहुमपीनपयोधरा ॥ चतुर्भुजा विशालाक्षी वाणमन्त्रं ध
नुस्तथा ॥ पुष्पपल्लवमूलादिफलशाकसमन्वयान् प्राणिनां जीविताय्यो यद्विभ्रती निर्यामले ॥ ४४ ॥ शा
कंभरीति ॥ एषापार्वत्यंशापद ॥ शाकंभरी ॥ शताक्षीसा दुर्गासैव प्रकीर्तितः ॥ उमागौरी सतीचंडी कालिके

भरिष्यामि सुराः शाकैरावृष्टेः प्राणधारकैः ॥ ४४ ॥ शाकंभरीति विख्यातिं तदा यास्याम्यहं भुवि ॥ त
त्रैव च वधिष्यामि दुर्गमाख्यं महासुरं ॥ ४५ ॥ दुर्गादेवीति विख्यातं तन्मे नाम भविष्यति ॥ पुनश्चा
हं यदा भीमं रूपं कृत्वा हिमाचले ॥ ४६ ॥ रक्षांसि भक्षयिष्यामि मुनीनां त्राणकारणात् ॥ तदा मां मु
नयः सर्वे स्तोष्यन्त्यानम्रमूर्तयः ॥ ४७ ॥ भीमादेवीति विख्यातं तन्मे नाम भविष्यति ॥ यदारुणाख्य
स्त्रैलोक्ये महाबाधां करिष्यति ॥ ४८ ॥

शाकपार्श्वेति शाकंभरीनीलवर्णेत्याद्युक्ते ॥ दुर्गनामासुरं तत्रैव ॥ शाकं
भरीवनाश्रय ॥ पद्मं मूलं करीरं फलकान्धिहृटकाः ॥ नवपुष्पकवचैव तिशाकं दशविधं स्मृतं ॥ अयं
दुर्गमासुरपुत्रः ॥ पुरुषान्नेति रैति ब्रह्मणो लब्धवरः स्वस्य वधे कालरात्रिहंतीति बोध्यम् ॥ नह
येभवत्यास्त्रिपुरा त्रिपुरसुंदरीकामाख्या जंभनी बगलामुखी धूमावती छिन्नमस्तामातंग्याद्याः ॥ शा
कंभर्यादि निरुद्रयामले ॥ ४५ ॥ दुर्गेति ॥ भीमं भयंकरं ॥ ४६ ॥ भक्षयिष्यामीत्यत्र ` ` ` हृदयविशिष्टिः ॥ ४७ ॥ भीम
ति ॥ भीमापि नीलवर्णा दंष्ट्रादशनभासुरा ॥ चंद्रहासं च डमरुं शिरः पात्रं च बिभ्रती ॥ एकवीरा कालरात्रि

निःक्रान्तस्मात्तुवन्ययेनुक्तिः ॥ इयं कालस्य शाप्व ॥ पंचाशत्तमेव ॥ तुर्युगे वैवस्वतमन्वंतरे एव भीमावतारः इति
लक्ष्मीतंत्रे ॥ यथैव येन पुत्राधिनाथ एकया ॥ आरुणाख्यारुणनामा ॥ ५४ ॥ तदेति ॥ भ्रामरं ॥ पालिपून ॥ भ्रम
रं ॥ असंख्येयाः षट्पदा ॥ यस्मिन् रूपे तत् ॥ ५५ ॥ भ्रामरीति ॥ तेजोमंडलदुर्द्धर्षा ॥ भ्रामरी चित्रकांतिभृत
चित्रभ्रमरपाणिः सा महामारीति गीयते ॥ महामायामहाकालीमहा ॥ स्वदानस्यास्यनुक्ते रियमपिकाल्य

तदाहं भ्रामरं रूपं कृत्वासंख्येयषट्पदं ॥ त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरं ॥ ५५ ॥ भ्रा
मरीति च मां लोकास्तदा स्तोष्यंति सर्वतः ॥ इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५० ॥ तदा ॥ ८ ॥
तदावतीर्याहं करिष्याम्यरिसंक्षयं ॥ ५८ ॥ इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवी
माहात्म्ये नारायणीस्तुतिः ॥ ११ ॥ उ० ॥ ५ ॥ श्लो० ॥ ५० ॥ मंत्रा ॥ ५५ ॥ ॐ गायैम सर्वेनारायणैपमहाहुतिं स्मर्प्य
यामि नमः स्वाहा ॥ देव्युवाच ॥ एभिः स्तवैश्च मां नित्यं स्तोष्यते यः समाहितः ॥ तस्याहं सकलां
बाधां नाशयिष्याम्यसंशयम् ॥ १ ॥ मधुकैटभनाशं च महिषासुरघातनं ॥ कीर्तयिष्यंति ये तद्वद्वधं

शाप्व ॥ सर्वं तस्यैव वैवस्वतेंतरएव षष्टितमचतुर्युगे भ्रामर्यवतार इति लक्ष्मीतंत्रे ॥ इत्यस्मिन्नायुत्र एव
यि ॥ ५० ॥ तदेति स्पष्टं ॥ ५८ ॥ इति श्रीशिवभट्टसुतनागोजीभट्टकृतौ सप्तशतीव्याख्यायामेक
ादशोऽध्यायः ॥ ११ ॥ देव्युवाच ॥ एभिरिति ॥ मधुकैटभवधादिलक्षणैरिन्यर्थः ॥ सकलामैहिकीं पा
रलौकिकीं च ॥ समाहितो नान्यमनाः ॥ १ ॥ तदेवाह ॥ मधीति ॥ २ ॥ ॥ ॥ ॥ ॥

दा.बं.
दु.टी.
५३

53

श्रोष्यंति च॥ चान्यविष्यंति॥ अष्टम्यामित्यादि मुख्यकालकथनं॥ ३॥ नेति॥ दुष्कृतं पापं॥ दरिद्रशब्दा
त्॥ ष्यत्रिति दारिद्र्यं॥ ४॥ शत्रुतः इति न शस्त्रेति संग्रामभिन्नविषयं॥ ५॥ तस्मादिति॥ सदा नित्यं हि ये
तं तन्माहात्म्यं स्वस्तिकल्याणं॥ तत्स्वायतनमार्गः॥ ६॥ उपेति॥ माहात्म्यकर्तृ महामारीश्रमयं शान्तभूता
महाजनक्षयंकरी देवता॥ ततः समुद्भाङ्गवो येषां तान्॥ उपसर्गानुपद्रवान्॥ तथा त्रिविधं॥ व्याधित

अष्टम्यां च चतुर्दश्यां नवम्यां चैकचेतसः॥ श्रोष्यंति चैव ये भक्त्या मम माहात्म्यमुत्तमम्॥ ३॥
न तेषां दुष्कृतं किंचिद् दुष्कृतोत्था न चापदः॥ भविष्यति न दारिद्र्यं न चैवेष्टवियोजनं॥ ४॥ श
त्रुतो न भयं तस्य दस्युतो वा न राजतः॥ न शस्त्रानलतोयौघात्कदाचित्संभविष्यति॥ ५॥ तस्मा
न्ममैतन्माहात्म्यं पठितव्यं समाहितैः॥ श्रोतव्यं च सदा भक्त्या परं स्वस्त्ययनं हि तत्॥ ६॥ उपसर्गा
नशेषांस्तु महामारीसमुद्भवान्॥ तथा त्रिविधमुत्पातं माहात्म्यं शमयेन्मम॥ ७॥ यत्रैतत्पठ्यते
सम्यङ्नित्यमायतने मम॥ सदा न तद्विमोक्ष्यामि सान्निध्यं तत्र मे स्थितं॥ ८॥ बलिप्रदाने पूजा
यामग्निकार्ये महोत्सवे॥ सर्वं ममैतच्चरितमुच्चार्यं श्राव्यमेव च॥ ९॥

गदेष्वादिरूपं॥ आध्यात्मिकं॥ भूतप्रेतादिजभयप्रमादि॥ आधिभौतिकं देवकृतं तु नवग्रहपातदारि
द्र्याद्याधिदैविकं॥ तद्रूपमुत्पातं॥ मनिष्टं॥ दिव्यभौमसमान्तरिक्षवेति त्रिविधमुत्पातं वा॥ ७॥ यत्रे
ति॥ यत्रायतने गृहे मम स्वंसंवत्सरं न तत्सम्यक्॥ अर्थावधारणपूर्वकं स्म अस्खलितवर्णादिकं॥ ८॥ ब
लीति॥ बलिप्रदाने देवतोद्देशेन पश्वाद्युपहारः॥ पूजा गंधादिनार्चनं॥ अग्निकार्ये॥ देवीदेवत्यो होमः॥ म

५ होत्सव पुत्रजन्म विवाहादि उच्चार्यमिति द्वितविषयं

फलमाह॥ज्ञानेनेति॥ज्ञानेनाविधिज्ञेन॥अज्ञानतानदन्येन। विधिसहितां पूजां। नयावै धावैधप्रकारे
ण॥तन्माहात्म्यादीरणं दोषमिति॥यथाकथंचिदपि कृतमेतन्मनोहि प्याभि॥ अंगीकरिष्यामीत्यर्थ॥चवर्गे
मध्य:थानुगणे बाहुलकोकं अनीकृथानुदिहरणार्थ॥१०॥पूजां दिनि॥शरत्काले॥आश्विनशुक्लप्रतिपदमा
रभ्य क्रियमाणां दुर्गोत्सवरूपा॥याच्वार्षिकी वर्षशब्दोवर्षादौलाद्गणिकः तेनचैत्रशुक्लप्रतिपदमारभ्य

ज्ञानताज्ञानतावापिवलिपूजांनथाकृतां॥ मतीक्षिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं॥१०॥शरत्कालेम
हापूजाक्रियतेयाचवार्षिकी॥ तस्यांममैतन्माहात्म्यंश्रुत्वाभक्तिः समन्वित:॥११॥सर्वबाधाविनि
र्मुक्तोधनधान्यसुतान्वितः॥ मनुष्योमत्प्रसादेनभविष्यतिनसंशयः॥१२॥श्रुत्वाममैतन्माहात्म्यंतथा
चोत्पत्तयशुभा:॥ पराक्रमंचयुद्धेषुजायतेनिर्भयः पुमान्॥१३॥रिपवः संक्षयंयांतिकल्याणंचोपप
द्यते॥ नंदतेचकुलंपुंसांमाहात्म्यंममश्रृण्वतां॥१४॥शांतिकर्मणिसर्वत्रतथादुःस्वप्नदर्शने॥ ग्रह
पीडासुचोग्रासुमाहात्म्यंश्रृणुयान्मम॥१५॥उपसर्गाः शमंयांतिग्रहपीडाश्चदारुणा:॥दुःस्वप्नंच
नृभिर्दृष्टंसुस्वप्नमुपजायते॥१६॥बालग्रहाभिभूतानांबालानांशांतिकारकम्॥संघातभेदेच

क्रियमाणं चैत्रपर्वे॥ श्रुत्वेति पंचभिः स्वाप्युपलक्षणं॥ एवमन्यत्रापि॥११॥सर्वाबाधासाबाधाचेत्यर्थः॥१२
उत्पत्तयः प्रादुर्भावाः॥द्वितीयार्थेप्रथमा॥पराक्रमंचेति एवोत्तत्रयिपुद्धेष्विन्युपलक्षणं॥१३॥उपपद्यते
प्राप्यते कुलेचनंदतेवर्धते॥१४॥शांतिकर्मे॥उपसर्गादिनिवर्तककर्मेतस्मिन् ततस्थानेऽत्यर्थः॥ग्रन्थ
सप्तम्यो॥ द्वितीयार्थे॥१५॥नदेवविवृणोति॥उपसर्गाइति उःस्वप्नस्वप्नशब्दौनत्पालेनपुंसकावपि॥१६॥क

॥ १८ ॥

॥ १८ ॥

इहैतानाउष्टानां व्याघ्रसूचकादीनां ॥१८॥ पक्षिन्यादि स्त्रीकृतयमेकान्वयि ॥ पष्पुर्व्वलिः आर्द्रोः छागः आप ः
ली रक्तशाग्रालिद व्यन्नननला निचयवत् ॥ सिद्धार्थकाश्चैव स्पृष्ठाणो यः प्रकीर्त्तितः ॥१९॥ विप्राणामिति
प्राज्ञणीयैः पंचामृताभिषेकादिभिः अन्येविविधाभोगाः स्नगादयः प्रदानैः मडुक्षेत्रीन विप्रेभ्यादीयमा
नैर्व्वस्त्रालंकारादिभिः एनेरहति शांति यमाणे यावन्त्सरणशीनि भवति ॥२०॥ सामिन्त्यचरितेन सहकृत्कृत्तेऽन्य
थः ॥ अवणमुपलत्तणं एतन स्यापि अवणोऽधिककफलत मिति कश्चित्त ॥ अनमिना युक्त नान्वयि ॥२१॥ क्रमसञ्ज ११

विप्राणां भोजनैर्होमैः प्रोक्षणीयैरहर्निशं अन्यैश्च विविधैर्भोगैः प्रदानैर्वस्त्रवेणया ॥२०॥ प्रीति
मेत्रियते सामिन्त्यकृत्स्वचरितेन श्रुते ॥ श्रुतं हरति निःपापानि तथा वेरयं प्रयच्छति ॥२१॥ वहांकरो
नि भवे भोजनम नां कीर्त्तनमम ॥ युद्धे पुत्र्यरितेयन्मे इष्टदैन्यानिवर्हेणं ॥२२॥ न सिंम कृतेनैव रिस
नेभयं पुंसां न जायते ॥ पुष्पाभिः स्तुतया याश्च यायाश्च प्रमाषिभिः कृता ॥२३॥ अरण्ये चरकृता
स्नास्व प्रयच्छंति शुभां मति ॥ अरण्ये प्रांतरे गाषिदावाग्निपरिवारिता ॥२४॥ दस्युभिर्वाहतः शू
न्ये गृहीतो वा पिशा नु भिः ॥ सिंहव्याघ्रानुयातो वा वनेवा वनहस्तिभिः ॥२५॥ राज्ञा क्रुद्धेन चाज्ञप्तो
वध्यो वधगतोपि वा ॥ आकृष्टोनोवाबाननाक्षिप्तः पातमहार्णवे ॥२६॥

स्मनां कीर्त्तनं सदित्यर्थः ॥ युद्धे क्षिन्युत्तरणान्वयि ॥२२॥ न सिमक्षितित्ति ॥ पुष्पाभि ॥ स्तुतयायाश्चेत्यनेन नारायणी
स्तृक्त ॥ नमोदव्यादिकं च सूक्तं स गृहीतम नथा ब्रह्माणोक्त ऋषिभिः सह ॥ या पुष्पाभिः कृता महिषा नकरी सूक्त
रुपाऽव्यर्थः यथानमस्तोत्रं श्रीणामधिकं तेन ॥ तथा प्रागेव निरुपितं ॥ कृताऽइति चरटषाऽव्यर्थकं ॥ नस्वीनं
बेकवाक्य नादिन्यवयेदं ॥ एवं चैतानि सर्व्वाणि स्तोत्रान्यकृतकान्यनादीनीतिबोध्यम ॥२३॥ अरण्येति

नं. दी.
ड. पं
५ प
इहैतानामशेषाणां बलस्रविकंपनं रोगहंत्रीपिशाचानां पठनादेव नाशनं
शन ११ पक्षगुणार्थेषु पैशुन्यं दैत्याक्रोशनैः ११ श्लोके॥

नं स्वाहेत्यादि रात्रिसूक्तरूपा॥ शुभां मोहाभ्युदयमानयंती॥ प्रयच्छंतीति देहादि अरण्ये इत्यादि श्लोकचतुष्टयमेका
न्वयि॥ प्रांतरे दूरस्थमार्गे॥ अरण्ये प्रांतरे वा दावाग्नीत्यादिनान्वयः॥ प्रांतरे शून्ये दस्युभिरित्यादिनान्वयः॥ केव
ले ग्रामे वा दस्युभिर्वा गृहीतो वा॥२४॥ दस्युभिरिति॥ शून्ये निर्जने॥ इदमग्रेणान्वयि॥ वनहस्तिभिरिति वनस्थ
हस्तिभिर्वा निग्राह्य॥२५॥ राज्ञेति॥ क्रुद्धेन राज्ञा वधयोग्य इत्याज्ञप्त इत्यन्वयः॥ सर्वं सुगमं समुच्चये॥ महार्णवे पोते
स्थितो वातेन वा घूर्णितस्याकुलितस्य॥२६॥ पतत्स्वेति॥ सर्वे स्वाबाधासु महापीडासु वेदनया दुःखेनाभ्यर्दि

पतत्सु चापि शस्त्रेषु संग्रामे भृशदारुणे॥ सर्वाबाधासु घोरासु वेदनाभ्यर्दितोपि वा॥२७॥ स्मरन्म
मैतच्चरितं नरो मुच्येत संकटात्॥ मम प्रभावात्सिंहाद्या दस्यवो वैरिणस्तथा॥२८॥ दूरादेव पलायंते
स्मरतश्चरितं मम॥ ऋषिरुवाच॥ इत्युक्त्वा सा भगवती चंडिका चंडविक्रमा॥२९॥ पश्यतामेव देवा
नां तत्रैवांतरधीयत॥ तेपि देवा निरातंकाः स्वाधिकारान्यथा पुरा॥३०॥ यज्ञभागभुजः सर्वे चक्रु
र्विनिहतारयः॥ दैत्याश्च देव्या निहते शुंभे देवरिपौ युधि॥३१॥

स्य॥२७॥ स्मरन्निति निमज्जो मेनि कर्मैक्यर्त्रे विनड. संकटं दुःखं॥ उत्तरार्द्ध
मग्रेणान्वयि॥२८॥ दूरादेवेति॥ मम चरितं स्मरतः मम प्रभावाद्दूरात्पलायंते इत्यन्वयः॥ उत्तरार्द्धमृ
षिरुवाचेत्यादि॥ चंडो दारुणः॥२९॥ पश्यतामिति॥ अनादरे षष्ठी॥ अंतरधीयत इति कर्मकर्तरि लङ्.
निरातंका निर्भयाः॥३०॥ दैत्याः शेषदैत्याः॥३२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

दु.टी. ५५ आययुः प्राविशन् ॥ २२ ॥ उपसंहरेति ॥ एवमिति ॥ संभूयाह प्रपश्यतीणगाउर्भूष ॥ २३ ॥ २४ ॥ तगामेति ॥ सारात्नवै
प्रपेश्वमथे ॥ एवमथपि ॥ ३६ ॥ देवीसूक्तं ॥ कर्णवदश्रमिद्धुमहविषमभिरिम्याहीन्येके ॥ श्रीसूक्तं मोच्यर्गाध्रसि
द्धमित्यन्ये ॥ वस्तुतो देवीसूक्तं नमो देव्या इत्यादिकं पंचमाध्यायस्थमत्र निरूपं ॥ तच्च सर्वदेवताकृतस्त्वा
यामहालक्ष्म्याः स्तोत्रं शुम्भादिभिर्वधार्थिभिर्विज्ञ्याहिमिर्देवैर्दृष्टं ॥ सर्वक्लेशापरिहारेण पूर्वोक्तफलकं ॥
तत्काम्याभ्यां ताभ्यां नमो ॥ अनुपदं मृ नतावद्दिमात्रे हि तेनाद्यं दमवदेवीसूक्तं पठेन शृहीतन्तु वितं ॥ ल

इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे श्रीदेवीमहात्म्ये फलानुवर्त्तनो नाम द्वादशोऽध्यायः १२ मंत्रा ४५ श्लोक ४४

तगाममग्र्यस्तपसे स च वैश्यो महामुने ॥ संदर्शनार्थमम्बाया नदीपुलिनसंस्थितः ॥ ६ ॥ स च वै
श्यस्तपस्तेपे देवीसूक्तं परं जपन् ॥ तौ तस्मिन् पुलिने देव्याः कृत्वा मूर्तिं महीमयीम् ॥ ७ ॥ अर्हणां च
क्रतुस्तस्याः पुष्पधूपाग्नितर्पणैः ॥ यताहारौ निराहारौ तन्मनस्कौ समाहितौ ॥ ८ ॥

ददतुस्तौ बलिं चैव निजगात्रासृगुक्षितं एवं समाराधयतोस्त्रिभिर्वर्षैर्यतात्मनोः २२ परितुष्टा जगद्धात्री प्रत्यक्षं प्राह चण्डिका २२
देव्युवाच २४

स्मीतं च संमतस्वाध्यायमर्थो इति प्रागेव निरूपितमित्यपरे ॥ प्राणयः ॥ संस्थितं बीजं हुताशने त्रिकोण ७
विंदुनादाख्ये प्रणिवादिनमोन्तकम् ॥ अंबिका सिद्धिदं जपेत् देवीसूक्तं परं स्मृतमिति ॥ हरु वित्यदयते ॥
अर्हणां चक्रुः ॥ अपिन तर्पणं होमः ॥ पुष्पधूपेति अग्निदीपामुपलक्षकं ॥ आदायनाहारेण ॥ अल्पाहारेण न श्री
तो निराहारौ यताहारौ ॥ अनेन हठयोगः सूचितः ॥ तन्मनस्कौ देवीमनस्कौ समाहितौ नान्यकेवास

55

५

रैव्याः स्त्यपादाने पंचमी ॥ २० ॥ सावर्णिर्भवितेति ॥ सावर्णिर्भविता मनुरित्यस्य पुनरावृत्तिर्वेद्यसमाप्तिकाल्यायणी
नेज्ञानं ॥ अंते मनुरित्येनेन सावर्णित्वारम्भ सावर्णिर्भविता मनुरित्यं तो यं महामालामंत्र इति स्तवद
५६ ति ॥ नतु मे लक्ष्मी नेत्रे समागहृदि स्थिता सेयं तन्मकमो वलिस्तुति । एतो द्विजमुखेवानु ज्ञानाध्यायीया
नो नरं सदा ॥ विधूय निखिलां मायां समं कृत्वा न ः समस्त ते ॥ सर्वा ॥ संपदस्त्रां मोनि भुनो ति सकलापद
पुनः सावर्णिर्भविता मनुरिति

56

एवं देव्या वरं लब्ध्वा सुरथः क्षत्रियर्षभः ॥ २७ ॥ सूर्याज्जन्म समासाद्य सावर्णिर्भविता मनुः ॥
इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे श्रीदेवीमाहात्म्ये सुरथवैश्ययोर्वरप्रदानं नाम त्रि
योदशोध्यायः ॥ १३ ॥ श्लोक ॥ २७ ॥ मंत्रा ॥ २९ ॥ सांगायै सर्वबीजाधिष्ठात्र्यै सुरथवैश्यवरप्रदा
ने महाहुतिं समर्पयामि नमः स्वाहा ॥

इति सावर्णिर्भविता मनुरिति ॥ द्विजमुखेनानुज्ञातेनानेनाष्टम्यां वा चतुर्दश्यां वामित्यादि कीलकोक्त
प्रकारेण ज्ञानं सुचिंतनमिति सर्वं सुस्थिरं ॥ इति कालोपनामक श्रीशिवभट्टसुतनागोजीभट्टनामोज्ञी
भट्टकृते सप्तशतीव्याख्याने त्रयोदशोध्यायः ॥ १३ ॥ शुभमस्तु ॥ चैत्रमासे कृष्णपक्षे द्वादश्यां भृगुवा
सरे ॥ पुरंदरे गणेशेन लिखितं पुस्तकं मया ॥ श्रीवेंकटविठ्ठलब्रह्मानंदमानयतिकस्त्वन सदा
त्यजक स भक्ति काकापीलमासिनी स्वाहा ॥ ५० ॥

संख्या